नेषु पूर्वमुक्तेषु न दान तत्र फलं दिशेत्॥ द्रव्यालंबनदं पत्यं स्याद्वृथं संचयनं परं॥ अति न्यूनतरं तस्य व्ययः स्यान्नात्र संशयः॥
अथवा नतु शकलं तहाकीशाखं भवेद्यदि॥ः हुमराहं जमानं वा तथैव पुनरागतं॥ स्थानेषु पूर्वमुक्तेषु कुत्र चिन्न हि न
त्फलं॥ कृपणः स्यान्नरः पत्यं दुःखभावं तथैव च॥ अथवा नतु शकलं नकीयलखदं भवेत्ः॥ आनवेखारिजं वापिः कजान्त
रिजकं तु वाः॥ उत्कारव्यं वा भवेन्नन्तुः तथैव पुनरागते॥ स्थानेषु पूर्वमुक्तेषु कुत्र चिन्न हि तत्फलं॥ अभाग्यं तु नरः पत्यम
किंचन मतीव हि॥ नकीयलखदं प्रोक्तंः हिंसा कलहकारकं॥ आनवेखारिजं प्रोक्तं निन्द्यापैशून्यकारकं॥ कजान्त
रिजकं प्रोक्तंः व्यभिचारिपलायितं॥ उत्कारव्यंः शकलं प्रोक्तं चौरं न्यूनतरं च वै॥ प्रेमपात्रं मम करे प्रातः स्याद्दान दैभवे
त्॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत्॥ प्रथमाच्चतुष्कलाच्चैव पञ्चमाच्च तथैव च॥ कुर्यादन्यद्धि शकलं प्रयत्नत॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न तथा पुनः॥ तस्माद्भुत्पन्नशकलात्तथैव च चतुर्दशात्॥ यच्छकलं कार्यमुत्पन्नं तच्चेत्सौम्यं तदाखिलं॥ तदा तु प्रेम
पात्रं तु हस्तस्थं निकटे भवेत्॥ यदि तच्छकलं क्रूरं तदाखिलं च भविष्यति॥ तदा तत्प्रेमपात्रं तु दुःखलभ्यं प्रयत्नतः॥ य
द्भूतन्साचितं सौम्यं शकलं च भविष्यति॥ तदा तत्प्रेमपात्रस्य सौहृदं स्थिरतां व्रजेत्॥ यद्भूतन्साचितं क्रूरं शकलं च भविष्य
ति॥ तदा तु प्रेमपात्रस्य वियोगः प्रेमपात्रतः॥ कदाचित्समये नैव जायते सुविनिश्चितं॥ अथ वा नतु शकलं क्रूरं स्यात्मुक्
त्वीवकं॥ तदा तत्प्रेमपात्रं तु स्वहस्तेन गमिष्यति॥ तेन साकं तु मैत्री स्याद्विरोधः स्यान्निरंतरं॥ अथ वा नतु शकलं सौम्यं
स्वारिजमागतं॥ आत्मनः प्रेमपात्रस्य मूले नैवान्तरं भवेत्॥ अथ वा नतु शकलं क्रूरं स्वारिजमागतं॥ तदात्मनः सकाशात
त्प्रेमपात्रं गमिष्यति॥ दृष्ट्वात्मानं प्रेमपात्रं समीपे न गमिष्यति॥ प्रीतिर्भवेत्तत्सकाशान्निश्चितं तदुदेशादिकं॥ इयोमध्ये च
मित्रत्वं भविष्यत्यथ वा न च॥ इति प्रश्ने कृते तत्र रमलज्ञो विचारयेत्॥ केन्द्रस्य शकलानां च १।४।७।१०। ये भवन्त्यग्निबिं
द्वः॥ तेषां संगणना कार्या प्रयत्नेन तथा पुनः॥ पणफरे २।५।८।११ स्थिता ये च संभवन्त्यग्निबिंदवः॥ तेषां च गणना कार्या
कृत्वेन त्प्रविलोकयेत्॥ पणफरस्य बिंदुभ्यो यदि केंद्रस्य बिंदवः॥ बहवः स्युस्तदा मैत्री भवेदात्मविभागतः॥ प्रेमपात्रेण मि
त्रत्वं स्वयमेव करिष्यति॥ एतस्माद्विपरीतं चेत्तदा स्यात्प्रेमपात्रतः॥ मित्रत्वं चेति विज्ञेयं दैवशास्त्रविशारदैः॥ इयं वार्त्ता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र. सि. न्विदम्पत्रं सत्यं वा नृतमेव च ॥ इति प्रश्ने कृते तत्र रमलं च विचारयेत् ॥ इति स्यात्पञ्चमस्थाने सौम्यं दाखिलसंज्ञितं ॥ वार्त्ताप
५९ त्रादिकं नहि सत्यं स्यान्नात्र संशयः ॥ अथवा क्रूरखारीजमुन्कलीबं तथाशुभं ॥ यद्वा च शुभसाबीतं यदि स्यात्पञ्चमे गृहे ॥ यत्र
वार्त्तादिकं सत्यं तदापि मिथ्या भवेद्ध्रुवं ॥ अथवा पंचमस्थाने तु स्यात्खारिजकं भवेत् ॥ सौम्यं च मुन्कलीबं च तदा तत्र फलं दिशेत् ॥
यत्र वार्त्तादिकं किंचित्सत्यं मिथ्या च वै तथा ॥ कस्मिंस्तु दिवसे वार्त्ता स्यागमिष्यति तन्वतः ॥ इति प्रश्ने कृते तत्र रमलं च विचारयेत् ॥
॥ पंचमस्थानसंस्थं तु यदि हि शकलकं भवेत् ॥ तस्य यः संभवत्खेटस्तस्य योवार उच्यते ॥ आगमिष्यंति वार्त्ता च तस्मिन्वारे विनिश्चितं
॥ अपूर्ववस्तुप्राप्तिश्च तदा दूतस्य चैव हि ॥ पृच्छकेन कृते प्रश्ने रमले च विलोकयेत् ॥ प्रथमास्यं च मात्रैव कार्ये शकलमुत्तमं ॥
एकादशात्तृतीयाच्च कार्ये शकलमुत्तमं ॥ एतयोरुभयोर्योगात्कार्यमन्यं प्रयत्नतः ॥ निष्पन्नमेतच्छकलं यदि स्यात्सौम्यदा-
खिलं ॥ सौम्यस्यान्मुन्कलीबं च तदा तत्र फलं वदेत् ॥ तदापूर्ववस्तुजातं दूतश्चैवागमिष्यति ॥ परं तु चिरकालेन रिक्तहस्त
श्च जायते ॥ अथवा तत्तु शकलं सौम्यं स्यान्मुन्कलीबकं ॥ तदा तु किंचिदागच्छेन्नागच्छेत्किंचिदेव हि ॥ अथवा तत्तु शकलं क्रू राम.
रं खारिजकं भवेत् ॥ क्रूरं साबितकं चैव क्रूरं वै मुन्कलीबकं ॥ तदापूर्ववस्तुजातं दूतश्च नागमिष्यति ॥ सत्यं वदति दूतोयं यद्वा ५९
मिथ्या वदत्यसौ ॥ इति प्रश्ने कृते तत्र रमलं च विचारयेत् ॥ प्रथमस्थानशकलं यदि स्यात्सौम्य साबितं ॥ यद्वा सौम्यं दाखि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लं स्यात्तदा सत्यं वदत्यसौ ॥ अथवा तत्तु शकलं सौम्यं खारिजकं भवेत् ॥ सौम्यं वा मुन्कलीबं स्यात्तदा तत्र फलं दिशेत् ॥ किंचित्
सत्यं च विज्ञेयं किंचित् मिथ्या वदत्यसौ ॥ अथवा तत्तु शकलं क्रूरं खारिजकं भवेत् ॥ क्रूरं च मुन्कलीबं स्यात्क्रूरं सावितमेव च ॥
तदा मिथ्या भवत्येव सत्यं नैव भवेत्कदा ॥ अथवा तत्तु शकलं मंकीशाख्यं भवेद्यदि ॥ तदा वदति मिथ्यासौ परं तु सत्यवत्कृतं
अथवा तत्तु शकलं बुधदैवतकं भवेत् ॥ तदा वदति मिथ्यासौ प्रश्नं तथ्यं प्रपंचितं ॥ आनंदश्च महोत्साहो भविष्यति न वा भवे
त् ॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत् ॥ प्रथमात्पंचमात्कार्यमुत्पन्नं शकलं पुनः ॥ चतुर्दशैकादशकयोगतोन्यद्धि नि
र्मेत् ॥ एतयोरुभयोर्योगादन्यच्छकलमुत्तमं ॥ एतस्माच्छकलात्सर्वं फलं ज्ञेयं मनीषिभिः ॥ एतच्चेच्छकलं सौम्यं दाखि
लं च भविष्यति ॥ तदानंदोत्सवादीनि कार्याणि च भवंति हि ॥ आरम्भश्च समाप्तिश्च शीघ्रकालेन वै भवेत् ॥ अथवा तत्तु शकल
मंकीशाख्यं भवेद्यदि ॥ तदानंदोत्सवादीनि कार्याणि च भवंति हि ॥ परं तु प्रांतकाले च क्लेशसंभारकारकम् ॥ अथवा तत्तु
60 शकलं क्रूरं खारिजकं भवेत् ॥ क्रूरं वा मुन्कलीबं स्यात्क्रूरं सावितकं च वा ॥ तदानंदोत्सवाद्यं च कार्यं न स्यादिति स्फुटं ॥ अ
थवा तत्तु शकलं सौम्यं खारिजकं भवेत् ॥ सौम्यं वा मुन्कलीबं स्यात्तदा तत्र फलं दिशेत् ॥ आनंदोत्सवकार्ये हि किंचित्स्यान्न च
किंचन ॥ इति पंचमभवनम् ॥ षष्ठके भवने यच्च द्रष्टव्यं तल्लिखाम्यहम्यहं ॥ पलायितस्य नष्टस्य चोरस्य च रुजस्तथा ॥ दासी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. पुत्रस्यदासास्तथैवचचतुष्पदः॥ द्विशफंयच्चतुष्पात्स्यात्तस्मिंश्चैवचतस्यच॥ पक्षिणांचैवसंप्रश्नः षष्ठकेभवनेभवेत्॥ दृष्ट
९० व्यंषष्ठकेस्थानेद्वितीयंप्रथमंचवै॥ एतत्स्थानत्रयेचैवशकलंसौम्यदाखिलं॥ सौम्यंवाभाषितंचेत्स्यात्तदातत्रफलंदिशेत्॥
पलायितःपराह्नस्यञ्चागच्छेत्तवसन्निधौ॥ एतत्स्थानत्रयेचेद्धाक्रूरंदाखिलकंभवेत्॥ कुत्रचिच्चिरकालेनतंकश्चिद्धारयि
ष्यति॥ एतत्स्थानद्वयेयद्वाक्रूरंखारिजकंभवेत्॥ क्रूरंवामुन्कलीबंस्यात्क्रूरंभाषितकंतुवा॥ तदापलायितस्येहप्राप्तिर्नी
स्याद्विनिस्फुटं॥ अथवाषष्ठकेस्थानेदाखिलंसमुपागतं॥ तदापलायितस्यापिसन्निधौचद्वितीयकः॥ वर्ततेपुरुषःकश्चिद्दि
तितत्रफलंदिशेत्॥ अथवाषष्ठकेस्थानेभाषितंसमुपागतं॥ पलायितस्तदाचास्तिसभामध्येविनिश्चितं॥ अथवाषष्ठकेस्था
नेखारिजंसमुपागतं॥ मुन्कलीबंभवेद्यद्वातदैकाकीचवर्तते॥ तस्मात्सर्वंफलंवाच्यंयथाहयवनःपुरा॥ एतच्छकल
कंचैवदाखिलंभाषितंतुवा॥ पलायितस्तदाचास्तिपुरमध्येविनिश्चितं॥ अथवैतत्तुशकलंखारिजंयदिवैभवेत्॥ पुरम राम.
ध्येतदानास्तिनिश्चयेपरिभाषितं॥ अथवैतत्तुशकलंक्रूरंखारिजकंभवेत् ॥तदातुनगरात्तंतुनिष्क्रान्तंसपलायितः॥ अ ९०
थवैतत्तुशकलंदाखिलंभाषितंतुवा॥ यदिस्यात्पुरमध्येतुवसतेवैपलायितः॥ अथवैतत्तुशकलंखारिजंयदिवैभवेत्
तदातुनगराद्दूरंगतस्याच्चपलायितः॥ अथवातत्तुशकलंक्रूरंखारिजकंभवेत्॥ दूरमार्गेस्थितश्चैवनगरात्तुपलायितः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥अथवातनुशकलंसौम्यंस्यान्मुन्कलीवकं॥तदागतंप्रकुरुतेप्रपन्नंचपलायितः॥अथवातनुशकलंक्रूरंस्यान्मुन्
कलीवकं॥पलायितस्तदामार्गेगच्छतीतिविनिश्चितं॥अथवातनुशकलंजमातारव्यंभवेद्यदि ३॥इज्जतमा ३ याह्वयंचापि
तदातत्रफलंदिशेत्॥यस्मात्स्थानात्समायातस्तत्स्थानंचगतःपुनः॥गवेषणकृतस्यापिभवेत्प्राप्तिःपलायितः॥नवाभ
वेदितिप्रश्नेरमलंचविलोकयेत्॥प्रथमस्थानशकलंयस्मिन्स्थानेपुनर्गतं॥ततःसर्वंफलंवाच्यंहीत्याहयवनःपुरा॥
प्रथमस्थानशकलंकेंद्रस्थानेभवेद्यदि॥आवेषणकृतस्तर्हिप्राप्तःस्याद्वैपलायितः॥प्रथमस्थानशकलंह्यागतंवैपणे
फरे॥तदागच्छतिमार्गेणनिश्चितंप्रपलायितः॥प्रथमस्थानशकलंयथापोक्लिमकेभवेत्॥तदानलभ्योनादृश्योनिश्चये
नपलायितः॥गवेषणकरोरिक्तपाणिश्चैवागमिष्यति॥वस्तुजातंतुनष्टंपुनर्हस्तगतंभवेत्॥नवेतिवेकृतेप्रश्नेरमलं
चविलोकयेत्॥षष्ठकात्सप्तमाच्चैवशकलंकार्यमुत्तमम्॥तच्चेत्सौम्यंदाखिलंस्यात्तदातत्रफलंदिशेत्॥समग्रंवस्तुजातं
हिप्राप्तंभवतिनिश्चितं॥अथवातनुशकलंसौम्यंमुन्कलीवकंभवेत्॥तदाकिंचिद्भवेत्प्राप्तंकिंचिन्नेतिचसंदिशेत्॥अथ
वातनुशकलंक्रूरमुन्कलिवंभवेत्॥क्रूरंरवारिजंकंवापिक्रूरंसाधितमेवच॥तदाकिंचिद्वस्तुजातंप्राप्तंनस्यादितिस्फुटं॥
अथयन्मनान्तरंवक्ष्येप्रश्नेनष्टस्यवस्तुनः॥रमलेषोडशस्थानेस्थितायेयुगबिंदवः॥तेषांतुगणनाकार्याद्वाभ्यांवैभाग

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. माहरेत्॥ एकशेषे भवेन्नष्टप्राप्तिश्चेति विनिर्दिशेत्॥ द्विशेषेन भवेत्प्राप्तिः कदाचिन्नष्टवस्तुनः॥ अन्यन्नतान्तरं वक्ष्ये।
६१ प्रश्नेन नष्टस्य वस्तुनः॥ यदि स्यात्सप्तमस्थाने कजाद्यारिवलकं तु वै॥ ÷ तु स्तद्यारिवलकं वापि ÷ तथैवानवदारिवलं ÷॥ अन
यासस्तदा प्राप्तिः पूर्णा स्यान्नष्टवस्तुनः॥ अथवानन्तु शकलं लह्यायारव्यं ÷ भवेद्यदि॥ तु स्तत्त्वारिजकं वापि फरारव्यं ÷ ÷ श
कलं तु वै॥ तदा स्वल्पं तरं वस्तु प्राप्यते सुविनिश्चितं॥ अथवानन्तु शकले वैपाजारव्यं भवेद्यदि॥ इञ्ज्ञमायाहवं ÷ चापि जमा
नारव्यं ÷ तथैव च॥ तदा वा दादियत्नेन प्राप्तिः स्यान्नष्टवस्तुनः॥ अथवानन्तु शकले ह्यंकीशारव्यं ÷ भवेद्यदि॥ तरीकारव्यं ÷
भवेद्वापि तदा तत्र फलं दिशेत्॥ तदा तु ईश्यायाल्केशैः प्राप्तिः स्यान्नष्टवस्तुनः॥ अथवा सप्तमस्थाने नकीयलखदं भवेत् ÷॥ क
जनवारिजकं वापि ÷ हुमरारव्यं तथैव च ÷॥ उस्कारव्यं ÷ शकले चैव तदा तत्र फलं दिशेत्॥ भविष्यति कदा नैव संप्राप्तिर्नष्ट
वस्तुनः॥ चोरप्रश्ने तु रमलैः कथ्यते त्र मयाधुना॥ यद्दस्या वस्तुनश्चोरं वस्तु च ज्ञायते ध्रुवं॥ संबंधः प्रथमस्थाने पृच्छकस्य च
वर्तते॥ द्वितीयस्थानसंबंधो वर्तते चोरवस्तुनः॥ सप्तमस्थानसंबन्धस्तस्करस्य च वर्तते॥ अष्टमस्थानसंबंधश्चोरनीतस्य राम.
वस्तुनः॥ यस्मिन्स्थाने पृच्छके तस्यापि तं वस्तु जातकं॥ तस्य स्थानस्य संबन्धश्चतुर्थे स्थानके भवेत्॥ यस्मिन्स्थाने पृच्छके ६१
तस्यापि तं वस्तु जातकं॥ तस्य स्थानस्य संबंधो दशमे स्थानके भवेत्॥ कृत्वा तु रमलं सर्वं सम्यक् तत्र विलोकयेत्॥ हुमरा ÷ क

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जन्वारीजं ३ आतवेरवारिजं तथा ३ ॥ यद्दिनायातिरमले तदानंदस्तुजातकं ॥ तस्करेण च नतीतं स्वयं च विस्मृतो भवेत् ॥ अथ
वा प्रथमस्थाने द्वितीये सप्तमे तथा ॥ षष्ठस्थाने च संस्थानं ३ शुभस्तुनवारिजकं तथा ॥ ३ फरात्वेत्ताः नरीकेच ३ समागच्छति चे
ध्रुवं ॥ पृच्छकेन तदा वस्तु व्ययश्चैव कृतो भवेत् ॥ अथवा कुत्रचित्स्थाने स्थापितं स्थानं स्वयं पुनः ॥ अथवा प्रथमस्थाने द्वितीये
सप्तमे तथा ॥ अष्टमे च तथा स्थाने शकलं हारितं भवेत् ॥ यदा तदा वस्तु युक्तस्तस्करो लभते ध्रुवं ॥ तस्करस्प्रकटो भूयात्त्व वे
ति यदि पृच्छति ॥ तदा तु रमलं कुर्यात्तत्र स्मायेच बिंदवः ॥ येषां शुभाशुभानां च कर्तव्या गणना ध्रुवं ॥ द्वाभ्यां तु भक्ता द्यच्छेषं
फलं तस्मात् उदीरयेत् ॥ एकशेषेण प्रकटो द्विशेषे २ प्रकटो भवेत् ॥ तस्करः किं पुमानस्ति कामिनी वापि वर्तते ॥ इति प्रश्नेकृते नेतत्र
रमलं च विलोकयेत् ॥ शुभाशुभानां बिंदूनां कर्तव्या गणना ध्रुवं ॥ त्रिभिर्भक्ते भवेच्छेषं फलं तस्मात् उदीरयेत् ॥ एकशेषे पुमांश्चौरो द्वि
२ शेषे कामिनी भवेत् ॥ त्रिशेषे ३ बालकं विंद्यादित्याह यवनः पुरा ॥ कुत्रस्य तस्करश्चौर इति प्रश्ने कृते सति ॥ कृत्वा तु रमलं त
त्र तस्मिन्ये बिंदवो मताः ॥ तेषां शुभाशुभानां च कर्तव्या गणना ध्रुवं ॥ त्रिभिर्भक्ताद्भवेच्छेषं फलं तदनु संदिशेत् ॥ एकशेषे गृहं
मांकेन तस्करस्य विशेषतः ॥ पृच्छकस्यैव शेषस्य निकटो च्छायया किल ॥ द्विशेषे स्वीयगेहस्य श्चौर इत्येव संदिशेत् ॥ त्रिशेषे
३ परकीयः स्याच्चौरो ग्रामांतरस्थितः ॥ रंगश्चौरस्य कीदृक्स्यादिति प्रश्ने कृते सति ॥ कृत्वादौ तत्र रमलं तत्र ये बिंदवः स्मृताः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. तेषां युगायुगानां च संख्या कार्या प्रयत्नतः॥ त्रिभिर्भक्ताङ्कवेच्छेषं यततः फलमादिशेत्॥ एकशेषे २ गौरवर्णः कृष्णपीतो भवे
६२ द्ध्रुवं॥ द्विशेषे चौरवर्णस्तु लोहितश्चेत उच्यते॥ त्रिशेषे चौरवर्णस्तु गोधूमाभो भविष्यति॥ अथवा हरितो वर्णश्चौरस्य च भविष्य
ति॥ तस्करः पुरमध्ये तु वर्तते स्थानवेति च॥ प्रश्ने कृते बुधस्तत्र रमलं हि विलोकयेत्॥ प्रथमाच्च चतुर्थाच्च सप्तमाद्दशमात्त
था॥ शकले कार्यं उत्पन्ने नाभ्यामन्यच्च साधयेत्॥ साधितं शकलं चैव तद्दाखिलं साधितं तु वा॥ यदि स्यात्तत्फलं प्रोक्तं चौरः स्या
त्पुरमध्यगः॥ अथवैतत्तु शकलं खारिजं यदि जायते॥ पुरमध्ये तदा नास्ति तस्करश्चेति निश्चितं॥ अथवैतत्तु शकलं मु
न्कलीवं यदा भवेत्॥ तदा चौरः पुरे चास्ति परं तु गमनोद्यतः॥ अन्यस्मिन्नान्तरं वक्ष्ये यज्ज्ञात्वा फलमादिशेत्॥ अष्टमं श
कलं चैव द्वादशं शकलं तथा॥ चतुर्दशं च शकलं तथा पञ्चदशं च वै॥ एतेषां शकलानां हि क्रमेणोपरि विंदवः॥ एकत्र क
रणीयाश्च तदेकं शकलं भवेत्॥ एतच्छकलकं चेत्स्याद्दाखिलं साधितं तु वा॥ पुरमध्ये तदा चौरो वर्तते सुविनिश्चितं॥ अ
थवा तत्तु शकलं खारिजं यदि जायते॥ तदा ग्रामाद्बहिर्यातस्तस्करश्चेति निश्चितं॥ अथवा तत्तु शकलं मुन्कलीवं य राम.
दा भवेत्॥ तदास्ति पुरमध्ये तु गंतुकामश्च तस्करः॥ चौरः कोऽयं स्वभावेन शीलेन सह वासतः॥ इति प्रश्ने कृते तत्र रम ६२
लं च विलोकयेत्॥ अष्टमं द्वादशं चैव तथैव च चतुर्दशं॥ [illegible] मेषां मूर्द्ध विंदवः॥ क्रमेणैकत्र कार्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लेन तदेकं शकलं भवेत्॥ एतत्पूर्वं तु कथितं यदेवात्राव लोकयेत्॥ एतच्छकलकस्थानं तुक्षिपक्षेण यद्भवेत्॥ फ
लितं तत्तु रूपेण वक्तव्यं च मनीषिभिः॥ एतस्य तुक्षिरूपेण स्थानं चेत्प्रथमं भवेत्॥ तदा चोरः स्वकीयः स्याद्गृहस्थ एव विनि
श्चितं॥ कदाचित्तुक्षिपक्षेण भवेत्स्थाने द्वितीयके॥ तस्करस्तु तदा ज्ञेयो गृहेषु व्यवसायिनां॥ कदाचित्तुक्षिपक्षेण तत्
स्थानं च तृतीयकं॥ भगिनीबंधुसुहृदां मित्राणां च गृहेषु च॥ तस्करो वर्त्तते नित्यमिति तत्र फलं दिशेत्॥ कदाचित्तुक्षि
पक्षेण स्थानं स्याद्वै चतुर्थकं॥ पितुः पितामहस्यापि कृषिकारस्य वै गृहे॥ कुग्रामवासिनामेव तदा भवति तस्करः॥ क
दाचित्तुक्षिपक्षेण स्थानमेतस्य पंचमं॥ द्यूतानां प्रेमपात्राणां वेश्यानां नृत्यकारिणां॥ कलावतां गुणीनां चौरोऽलिसदने
षु च॥ कदाचित्तुक्षिपक्षेण स्थानमेतस्य षष्ठकं॥ तदा स्याद्दासदासीनां सेवकानां गृहेषु च॥ कदाचित्तुक्षिपक्षेण स्थान
मेतस्य सप्तमं॥ शय्यादानां च नारीणां गृहे स्यात्तस्करस्तदा॥ कदाचित्तुक्षिपक्षेण स्थानमेतस्य चाष्टमं॥ इन्द्रजालकृतां
चैव तथा वणिजां गृहे॥ मार्गस्थानां तु हेतूनां प्रेतकर्मकृतां तथा॥ गृहेषु वर्त्तते चौर इति तत्र फलं दिशेत्॥ कदाचित्तु
क्षिपक्षेण नवमस्थानकं भवेत्॥ तथा तीर्थकृतां गेहे तथैवातिथिनां च वै॥ तपस्विनां च पंथानां श्रेष्ठानां सदनेषु च॥ वर्त्त
ते चौर इत्येवं निर्दिशेच्च प्रयत्नतः॥ अथवा तुक्षिपक्षेण दशमं स्थानकं भवेत्॥ राज्ञां चैव प्रधानानां तथा मुद्राधिकारि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ णां॥ गृहेषुज्ञानमानंचवर्त्ततेचौरइत्यपि॥ कदाचित्तुक्रिपक्षेणस्थानमेकादशंभवेत्॥ मित्राणांचतथान्यानांगृहेवसतित
६३ स्करः॥ कदाचित्तुक्रिपक्षेणस्थानेद्वादशकेभवेत्॥ कारागृहस्थितानांचलोकजागरणिकारिणां॥ नीचानांद्यूतकानां
चमध्येवसतितस्करः॥ धनिकस्यचचौरस्यगृहेग्राममध्यदेशकः॥ गृहाणिकतिसंतीतिकृतेप्रश्नेविलोकयेत्॥ पंचमः
स्थानकेचैवषष्ठस्थानेतथैवच॥ सप्तमस्थानकेचैवनवमस्थानकेतथा॥ शकलानिचयानिस्युस्तेषांयेबिंदवोमताः॥
तेषांसमासमानांचबिंदूनांगणनाभवेत्॥ पंचमस्थानशकलबिंदुभिर्भोगमाहरेत्॥ शेषंतुयत्प्रजायेतसंख्यानिगृ
हाणिच॥ उभयोर्गृहयोर्मध्येवर्त्ततेइतिनिश्चितं॥ तस्करस्यगृहंकस्यांदिशायांचैववर्त्तते॥ इतिप्रश्नेकृतेतत्ररमलंचवि
लोकयेत्॥ रमलेदशमस्थानेशकलंयद्भविष्यति॥ तस्यवैशकलस्येहयादिशावैप्रकीर्त्तिता॥ फलेनतदनुरूपंहिवक्तव्यंच
प्रयत्नतः॥ प्राच्यांवापिप्रतीच्यांवादक्षिणोत्तरयोस्तथा॥ तस्करस्यगृहेद्वारंकस्यांदिशिचवर्त्तते॥ इतिप्रश्नेकृतेतत्ररम
लंचविलोकयेत्॥ नवमस्थानशकलंयद्भवेत्तस्ययादिशा॥ फलेनदिशयावाच्यंहीत्याहयवनःपुरा॥ तस्करस्यगृहे राम॰
द्वारंकीदृशंतत्रवर्त्तते॥ इतिप्रश्नेकृतेतत्ररमलंचविलोकयेत्॥ जमातमिज्जिमायेवा ≡ यदिस्यान्नवमेगृहे॥ तदा ६३
तस्करगेहस्यद्वारस्यलेखितंध्रुवं॥ अथवानवमस्थानेहुमरावानकीभवेत्॥ ≡: तदातस्करगेहस्यद्वारंश्वेतंभवि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्यति॥ भवेद्धृद्धरज्जुकं तथा रेखायुतं तु वा॥ अथवा नवमस्थाने लक्ष्माणं शकलं भवेत्॥ यद्वा चन्तु तद्वस्त्रीलं ⁝ त
दा तत्र फलं दिशेत् तदा तस्करगेहस्य द्वारं विविधरंजितं॥ अंकीशं चाकलावापि ⁝ यदि स्यान्नवमे गृहे॥ तदा
चौरगृहद्वारं स्यामवक्रं च वै भवेत्॥ अथवा नवमस्थाने फरारवं ⁝ शकलं भवेत्॥ आतवेदाखिलं वापि ⁝ तदा तत्र
फलं दिशेत्॥ तदा चौरगृहद्वारं लेपितं गोमयं भवेत्॥ स्वलंकृतं भवेत्तत्र निर्दिशेद्दिननिश्चितं॥ यद्वा तु स्त्रन्त्वारीज
कज्जद्वाखिलकं तु वा ⁝॥ यदि स्यान्नवमस्थाने तदा तत्र फलं दिशेत्॥ द्वारमुच्चैर्वरत्वं वा रमणीयं तथैव च॥ अथ
वा कज्जन्त्वारीजं द्वा नवे खारिजं तथा ⁝॥ यदि स्यान्नवमस्थाने -- तदा तत्र फलं दिशेत्॥ संध्याकारं च निम्नं च तदा
द्वारं विनिर्दिशेत्॥ अथवा नवमस्थाने वयाजं च तरीककं ⁝॥ सुकं च निःकपाटं च द्वारं स्याज्जलसन्निधौ॥ तस्कर
64 स्य स्वरूपं हि विग्रहेण कथं भवेत्॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत्॥ यत्किंचिच्छकलं चेत् स्यात्सप्तमस्थान
के गतं॥ फलं तदनुरूपेण कथनीयं मनीषिभिः॥ शुभे च सप्तमे स्थाने लक्ष्माणं ⁝ शकलं भवेत्॥ तदा चौरस्य भवति विशा
लाक्षो विशालाननः॥ विशालभालदेशश्च कृशनासिकमेव च॥ असंस्पृष्टं भ्रुकुटिभिर्विहतास्यश्च वै भवेत्॥ कम्बके
शः श्वेतदेशपीतश्चित वै भवेत्॥ तस्यानने कन्धरे वा भाले वा तिलचिन्हकं॥ अथवा सप्तमस्थाने कज्जद्वाखिल ⁝ माग

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰ सि॰ ६४

तं ॥ नरश्चौरश्चतुष्कोणो न गुरुर्न लघुश्च वै ॥ श्वेतपीतारुणैर्वर्णैः स्वलक्ष्मशरीरकः ॥ गोधूमवर्णसदृशः शरीरे बहुकेशधृ-
क् ॥ कृष्णवर्णः कृष्णकेशो भालभ्रूयुगलश्च वै ॥ स्थूलशीर्षो महद्भालो यदा चिन्हश्च वै भवेत् ॥ श्रेष्ठस्थानस्थितश्चैव
स्थूलदंतश्च वै भवेत् ॥ अथवा सप्तमस्थाने कजनवारिजं मागतं ॥ नरस्तु श्रमयुक्तो रोगी मिथ्यावादी च निन्दकः ॥ कृष्णने-
त्रः कृष्णकेशः स्निग्धभ्रूयुगलश्च वै ॥ ह्रस्वपादो ह्रस्वहस्तस्तिर्यगंगुलिरेव च ॥ मांसलश्च तु चिन्तश्च वामचक्षुः स्थितो भवे-
त् ॥ तस्य वक्षसि रोमाणि सुबहूनि भवंति च ॥ तस्यानने च नासायां हरितोपिश्यामलः ॥ नीचवृद्धिर्दीर्घकेशः कर्णस्तकरएव
च ॥ अथवा सप्तमस्थाने जमातं ÷ शकलं भवेत् ॥ नरश्चौरश्चतुष्कोणः स्थूलशीर्षललाटकः ॥ नरो विरलदंतश्च क्षतः स्यान्न-
मुखोपरि ॥ त्रिभिर्वर्णैर्मिश्रितश्च देहस्तस्य भवेद्ध्रुवं ॥ अथवा सप्तमस्थाने फरारव्यं शकलं भवेत् ÷ ॥ अप्राप्तयौवनस्तर्हि
चौरः स्यान्नात्र संशयः ॥ श्मश्रुहीनो भवेत्सोपि स्वल्पश्मश्रुश्च वा भवेत् ॥ मध्यमूर्त्तिः कृष्णनेत्रः कृशनासः प्रकीर्तितः ॥ सं-
मीलितरदश्चैव श्वेतदेहश्च तस्करः ॥ अथवा सप्तमस्थाने उत्कारव्यं ÷ शकलं भवेत् ॥ नरश्चौरश्चतुष्कोणो मांसलश्च प्रकी- राम
र्तितः ॥ न दीर्घो न च ह्रस्वोपि कृष्णदेहश्च वै भवेत् ॥ दासीपुत्रादिनीचानां मध्ये दृष्टव्यमेव च ॥ अगुणस्तस्य नेत्रे स्याद्घद्दा ६४
काणाक्षमेव वा ॥ स्वल्पश्मश्रुः कृशोरुश्च वक्रदंतश्च कीर्तितः ॥ तस्य शीर्षे च देहे वा चिन्हं स्यान्नात्र संशयः ॥ अथवा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सप्तमस्थाने चांकीशं = शकलं भवेत्॥ तदा चौरो महादेहश्चतुष्कोणश्च वा भवेत्॥ स्थूलोष्ठः स्थूलदेहश्च स्थूलवार
श्च वै भवेत्॥ वक्रकेशः पिंगलास्यः कृष्णदेहश्च वै भवेत्॥ दीर्घदंतो दीर्घनासो पादयोरव्रणो भवेत्॥ अथवा सप्तमस्था
ने द्रुमरा = शकलं भवेत्॥ तदो श्वैर्निनरां चौरो कृष्णदेहः प्रकीर्तितः॥ नयनेषु सचिन्हः स्याद्विशालगललगंडकः॥ अथवा
सप्तमस्थाने वयाजं = शकलं भवेत्॥ तदा चौरः श्वेतदेहः पूर्णांगः सुंदराननः॥ मिलितभ्रूः सूक्ष्मशीर्षो विशालास्यः प्रकी
र्तितः॥ तस्याननेभवे चिन्हं श्वेतपीतशरीरधृक्॥ अथवा स सप्तमस्थाने तु स्तनवारिजकं भवेत् = तदा चौरोनातिदीर्घोना
तिह्रस्वः प्रकीर्तितः॥ श्वेतारुणशरीरश्च सूक्ष्मशीर्षः प्रकीर्तितः॥ विशालभालदेहश्च विशालनयनश्च वै॥ बहुश्रूतिल
कश्चैव दक्षिणांगे च चिन्हधृक्॥ अथवा सप्तमस्थाने तु स्तद्दाखिलकं = भवेत्॥ तदा चौरश्चतुष्कोणो वर्तुलास्यः प्रकीर्तितः
॥ कृष्णनेत्रो विभक्तश्रूः स्थूलशीर्षः प्रकीर्तितः॥ विशालभालदेहश्च त्रिवर्णांगश्च तस्करः॥ अथवा सप्तमस्थाने ह्यानवेस्वा
रिजं = भवेत्॥ तदा दीर्घश्च पुष्टश्च तस्करः संप्रकीर्तितः॥ रूक्षांगो दुर्दशास्य ‾ श्च मार्जाराकार एव च॥ तीक्ष्णनेत्रोऽथवा वक्र
65 नेत्रश्चैव प्रकीर्तितः॥ तस्य नेत्रो भवेत्कश्चिद्गुणश्च विनिश्चितं॥ यद्वा नक्षत्रान्धता तस्य भविष्यति विनिश्चितं॥ अथवा ने
त्रमध्ये तु पुष्पं स्यान्नात्र संशयः॥ अथवा मांसवृद्धिः स्यात्तस्य नेत्रे विनिश्चितं॥ देहेन कृष्णपीतश्च यद्वारुणशरीरधृक्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अथवासप्तमस्थानेनकीयलखंडंभवेत्॥तदाचौरोभवेद्दैवैःपृष्ठांगश्चैवनिश्चितं॥नीचनेत्रःश्वेतध्वांक्षोविशालह
शनैश्चवै॥यद्यापतितदंतश्चमिलितभ्रूयुगश्चवै॥कृशोकृष्णश्मश्रुहीनश्चतन्नेत्रेश्वेततनाभवेत्॥लंबनासश्चविज्ञेयोमू
लवांगुलिकश्चसः॥स्थूलशीर्षमुखेतस्यदंतंस्याच्चविनिश्चितं॥गोधूमवर्णसदृशोप्यथवाश्वेतरूपधृक्॥अथवास
प्तमस्थानेह्यातवेराखिलंभवेत्॥तदाचौरोदीर्घतरःकृशदेहश्चनिश्चितं॥श्वेतवर्णश्चदीर्घोष्ठोनीलनेत्रश्चवर्त्तते॥अ
थवादृढेरास्तश्चसूक्ष्मशीर्षःप्रकीर्तितः॥विभक्तभ्रूयुगश्चैवतस्करःसंप्रकीर्तितः॥मुखेवानासिकायांचचिन्हंस्यात्सत
जंचवै॥अथवासप्तमस्थानेइज्जतमायाह्वयंभवेत्॥तदागोधूमवर्णश्चतस्करःसंप्रकीर्तितः॥बहुभ्रूतिलकश्चैवसु
दृशास्यःप्रकीर्तितः॥कृष्णनेत्रोदीर्घकेशोरुच्चनासःप्रकीर्तितः॥दीर्घोलघुश्चदेहेनरूक्षांगःसंप्रकीर्तितः॥अथवासप्त
मस्थानेतरीकंःशकलंभवेत्॥तदागोधूमवर्णश्चकिंचित्पीतेनमिश्रितः॥उच्चनासोदीर्घकेशःस्वल्पश्मश्रुश्चतस्करः
॥सूक्ष्मदंतश्चविज्ञेयश्चिन्हंस्यात्तस्यविग्रहे॥चौरेणवस्तुजातंचकुत्रस्थानेकृतंभवेत्॥इतिप्रश्नेकृतेतत्ररमलंचवि
लोकयेत्॥द्वितीयाद्दशमाच्चैवकार्यंशकलमुत्तमं॥दशमाद्द्वादशाच्चैवकार्यंशकलमुत्तमं॥सप्तयोरुभयोर्योगात्
कार्यंशकलमुत्तमं॥सतस्माच्चतुष्कलाच्चैवफलंसर्वंसमादिशेत्॥उत्पन्नंशकलंतत्तुउक्तारव्यंःयदिजायते॥तदाचौ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रेण तद्वस्तु निःक्षिप्तं धरणीतले ॥ यद्वा दक्षिणदिग्भागे कृत्वा संपुटके शुभे ॥ पृथिव्यां निहितं च स्यादित्येवं फलमादि-
शेत् ॥ अथवा तत्तु शकलं हंकीशाख्यं ≡ भवेद्यदि ॥ तदा चौरेण तद्वस्तु प्रतीच्यां निहितं भवेत् ॥ वृक्षे वा क्षितिगर्भे वा त-
थैवोच्चगृहोपरि ॥ अथवा तत्तु शकलं हुमराख्यं ≡ भवेद्यदि ॥ तदा चौरेण तद्वस्तु दग्धे च धरणीतले ॥ अगन्यागारेऽथवा तु-
षं स्थापितं चेति तद्वदेत् अथवा तत्तु शकलं जमातीख्यं ≡ भवेद्यदि ॥ तदा चौरेण तद्वस्तु दक्षिणाशाविभागके ॥ निक्षिप्तं पृथि-
वीगर्भे फलमेवं हि संदिशेत् ॥ अथवा शकलं तत्तु फराख्यं ≡ यदि जायते ॥ तदा चौरेण तद्वस्तु पश्चिमाशाविभागके ॥ उ-
त्स्थाने क्षितिगर्भे वा स्थापितं स्यान्न संशयः ॥ अथवा तत्तु शकलं बयाजाख्यं ≡ भवेद्यदि ॥ तदा चौरेण तद्वस्तु सौम्यदिग्-
भागके शुभे ॥ हरिनस्थानके यद्वा रमणीयस्थले तु वा ॥ गोपितं चेति विज्ञेयं रमलं शास्त्रकोविदैः ॥ अथवा तत्तु शकलं क-
ज्जुहाखिलकं ≡ भवेत् ॥ तदा चौरेण तद्वस्तु दक्षिणाशाविभागके ॥ निःक्षिप्तं पृथिवीगर्भे फलमेवं समुदीरयेत् ॥ इज्जिमाया-
ह्वयं चैव शकलं यदि तद्भवेत् ॥ ≡ तदा चौरेण तद्वस्तु पश्चिमाशाश्मशानके ॥ म्लेच्छदेवालये वापि यत्र स्थाने तथैव च ॥
66 कृत्वा संपुटके चैव स्थापितं चेति संदिशेत् ॥ अथवा तत्तु शकलं ह्यातवेरवारिजं ≡ भवेत् ॥ तदा चौरेण तद्वस्तु हस्तिशालात-
थैव च ॥ वृषशालास्थले चैव तयोः स्थानके पि च ॥ प्राच्यां दिशायां निहितमिति तत्र फलं दिशेत् ॥ अथवा तत्तु शकलमा-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ ६६ नवेद्राखिलं ः भवेत् ॥ तदा चौरेण तद्वस्तु दक्षिणाशाविभागके ॥ आरामादिस्थले चैव निःक्षिप्तमिति संदिशेत् ॥ अथ
वा तन्तुशकलं तु स्त्रद्राखिलकं ः भवेत् ॥ तदा चौरेण तद्वस्तु सौम्यदिग्भागके शुभे ॥ महामार्गस्य मध्ये वा हरितस्थानके
शुभे ॥ निक्षिप्तं पृथिवीगर्भे फलमेवं समादिशेत् ॥ अथवा शकलं तन्तु नरीकारव्यं ः भवेद्यदि ॥ तदा चौरेण तद्वस्तु प्राच्यां
दिशि विनिर्दिशेत् ॥ श्रेष्ठस्थाने मार्गमध्ये निःक्षिप्तं धरणीतले ॥ अथवा तन्तुशकलं नकीयलखदं ः भवेत् ॥ तदा चौरे
ण तद्वस्तु सौम्यदिग्भागकेषु च ॥ समीपे पादपस्येह हरितस्थानके शुभे ॥ स्थापितं चेति विज्ञेयं रमलेशास्त्रकोविदैः ॥
अथवा तन्तुशकलं लह्यानारव्यं ः भवेद्यदि ॥ तदा चौरेण तद्वस्तु प्राचीदिग्भागके शुभे ॥ म्लेच्छदेवालयस्यापि समीपे
ननथैव च ॥ स्थापितं चेति विज्ञेयं रमलेशास्त्रकोविदैः ॥ अथवा तन्तुशकलं कजनवारिजकं भवेत् ॥ तदा चौरेण तद्व
स्तु प्राचीदिग्भागके शुभे ॥ अग्न्यागारेथवा शून्यगृहे मूत्रपुरीषयोः ॥ स्थापितं चेति विज्ञेयं रमल-शास्त्रानुसारतः ॥
अथवा तन्तुशकलं तु स्त्रनवारिज ः कं भवेत् ॥ तदा चौरेण तद्वस्तु प्राचीदिग्भागके शुभे ॥ अग्न्यागारेथवा मार्गमध्ये वै
व महानसे ॥ चुल्लीभस्मनि निःक्षिप्तमिति तत्र फलं दिशेत् ॥ अस्य हस्तेन चौरस्य धारणं वै भविष्यति ॥ इति प्रश्ने कृते तत्र राम॰ ६६
रमलं च विलोकयेत् ॥ तत्रापि दशमस्थाने यत्नेन प्रविलोकयेत् ॥ दशमस्थानसंस्थं तु शकलं यद्भविष्यति ॥ फलं त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्तु सारेण वक्तव्यं च मनीषिभिः॥ यदि स्याद्दशमस्थाने लग्नात्शकलं शुभं॥ तदा तु पृच्छकश्चौरं स्वयं वै धारयिष्यति॥ अथ
वा दशमस्थाने कजाद्याखिलकं भवेत्॥ तदा तु पृच्छकस्येह मित्रं वा वसुरक्षकः॥ धारयिष्यति तं चौरं हीत्याह यवनः पु
रा॥ अथवा दशमस्थाने जमाते शकलं भवेत्॥ पृच्छकस्य पिता यद्वा पितृव्यस्तस्करं ध्रुवं॥ धारयिष्यति यत्नेन नात्र
कार्या विचारणा॥ अथवा दशमस्थाने कजान्वारिजसंज्ञितं॥ शकलं यदि भावेन तदा तत्र फलं दिशेत्॥ बन्धुश्च भगि
नी वापि तद्वेश्मनिकटे गृहात्॥ पृच्छकस्यैव विज्ञेयं धारयिष्यति तस्करं॥ अथवा दशमस्थाने फराख्यं शकलं भवे
त्॥ पृच्छकस्य सुतो वापि प्रेमपात्रसुतस्करः॥ धारयिष्यति तं चौरमित्याह यवनः पुरा॥ अथवा दशमस्थाने उत्काख्यं
शकलं भवेत्॥ पृच्छकस्य तदा दासदासीपुत्रश्च वै ध्रुवं॥ धारयिष्यति तं चौरमित्याह यवनः पुरा॥ अथवा दमस्थाने
भवेदंकीशसंज्ञितं॥ पृच्छकस्य तदा शत्रुर्विभागो वा विलासिनी॥ धारयिष्यति तं चौरं नात्र कार्या विचारणा॥ अथवा दशम
स्थाने वयाजं शकलं भवेत्॥ शास्त्रज्ञः पंडितो वापि पांथस्तीर्थनिषेवकः॥ धारयिष्यति तं चौरमित्याह यवनः पुरा॥ अथवा
67 दशमस्थाने तुस्त्रन्वारिजं कं भवेत्॥ तदा संधारयेच्चौरं पृच्छकः स्वयमेव हि॥ अथवा दशमस्थाने ह्यानवेदाखिलं भ
वेत्॥ सुहृदः पृच्छकस्यैव धारयिष्यति तस्करं॥ अथवा दशमस्थाने इज्तिमाया ह्वयं भवेत्॥ तदा पृच्छकहायादलक्ष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ ६७

रंधारयिष्यति॥ अथवा दशमस्थाने तरीकं ः शकलं भवेत्॥ तदा पृच्छकमित्राणि दायादास्तथैव च॥ तस्करं धारयि
ष्यंति नात्र कार्या विचारणा॥ अथवा दशमस्थाने तु स्तद्दाखिलकं भवेत्॥ तदा पृच्छकमित्राणि तस्यास्ताः सेवकास्तु वा॥
तस्करं धारयिष्यंति यथा हयवनः पुरा॥ आगमिष्यति वै चौरो नागमिष्यति चेति वै॥ पृच्छकेन कृते प्रश्ने रमलं च विलोकये
त्॥ प्रथमे भवने पूर्वं मिस्लखारिजकं भवेत्॥ मुस्लखारिजकं वापि सप्तमे शकलं च यत्॥ एतयोर्योगतः कार्यमन्यच्छ
कलमुत्तमं॥ उत्पन्नं शकलं यत्तु तच्चेद्दाखिलकं भवेत्॥ आगमिष्यति वै चौरस्तदेति फलमादिशेत्॥ अथवा खारिजं चे
त्स्यान्नागमिष्यति वै तदा॥ मुन्कलीबं तदा तत्तु शकलं जायते ध्रुवं॥ तदा कदाचिदायाति कदाचिन्नेति संदिशेत्॥ सा
बितं चेद्भवेत्तत्तु नागच्छति चकितो भवेत्॥ गंतव्यं वा तु वक्तव्यमिति चेति करोति च॥ तत्रापि सौम्यसाबीतं यदि स्याच्छ
कलं हितं तत्॥ तदा चौरः कदाप्येवं नागमिष्यति निर्दिशेत्॥ तस्कराः कति संतीति कृते प्रश्ने विलोकयेत्॥ सप्तमस्थान
कं यत्तु तत्र यच्छकलं भवेत्॥ पुनरावृत्तिरेतस्य कति स्थानेषु विद्यते॥ अथवा पुनरावृत्तिर्न भविष्यति चेत्तदा॥ एकाकी राम॰
तु तदा चौर इति तत्र फलं दिशेत्॥ कस्मिन्स्थाने तु चौरेण स्थापितं वस्तु जातकं॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत्॥ ६७
चतुर्थस्थानकं यत्तु तत्र यच्छकलं भवेत्॥ स्थानं तदानुमानेन वक्तव्यं च विशेषतः॥ तथैव पंचमस्थाने साक्षिन्वे प्रवि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लोकयेत् ॥ तस्मात्सर्व्वं भवत्येव फलं पूर्वोक्तमेव च ॥ किंवस्तुः कः पदार्थश्च नीतश्चौरेण निश्चितं ॥ इति प्रश्ने कृते नन्तर
मलग्नं च विलोकयेत् ॥ तत्रापि षष्ठकस्थाने शकलं यद्भविष्यति ॥ फलं तदनुसारेण वक्तव्यं च मनीषिभिः ॥ षष्ठकस्थाने शु
क्लं तद्वा नारव्यं ≡ भवेद्यदि ॥ तदा तु पद्मरागश्च रत्नं विद्रुममेव च ॥ हरिताली लाजवर्त्तः काचकूपी तथैव च ॥ सुवर्णं चै
व रौप्यं च नीतं चौरेण निश्चितं ॥ अथवा षष्ठकस्थाने कजहाखिलकं ≡ भवेत् ॥ श्वेतांजनं गंधकश्च तथैव च मनःशिला
॥ इत्यादिकं तदा तच्च तस्करेण विनिर्दिशेत् ॥ अथवा षष्ठकस्थाने कअन्वारिजकं ≡ भवेत् ॥ हरिताली गंधकश्च ताम्रं सी
सं च लोहकं ॥ नीतं च तस्करेणेति तदा तत्र फलं दिशेत् ॥ अथवा षष्ठकस्थाने जमातं ≡ शकलं भवेत् ॥ जवाहरजरदाम
णिः काचकूपी तथैव च ॥ पेरोजाख्यमणिश्चैव पाषाणाह्वमणिस्तथा ॥ पारदश्चैव सीसं च नीतं चौरेण निर्दिशेत् ॥ अथवा
षष्ठकस्थाने फराख्यं ≡ शकलं भवेत् ॥ मुक्ताफलं च माणिक्यं मुक्ताशुक्तिस्तथैव च ॥ रौप्यं चैव तदा नीतं तस्करेणेति नि
र्दिशेत् ॥ अथवा षष्ठकस्थाने उत्काख्यं ≡ शकलं भवेत् ॥ तदा तु हारशृंगं च सीसं लोहं तथैव च ॥ लोहं कृष्णं च पाषा
63 णं विशेषमणिमेव च ॥ तदा नीतं तस्करेण फलमेतद्धि निर्दिशेत् ॥ अथवा षष्ठकस्थाने यद्यङ्कीशं ≡ समागतं ॥ क
निष्ठिचिह्नला विशेषश्च मणिश्यामो हि ईशितः ॥ आरक्तकुसुमश्चैव लोहं सीसं तथैव च ॥ तदानीतं तस्करेण फलमे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तद्धि निर्दिशेत् ॥ अथवा षष्ठकस्थाने कुमरा ≡ शकलं भवेत् ॥ तदा माणिक्यजातं चेद्रुक्पाषाणकं च वा ॥ रक्तमृण्
मयपात्रं च शुक्तिका च तथैव च ॥ लोहजाताम्रजाद्या भित्तु कोणमपाटिका ॥ तदा चौरेण नीतेति फलमेतद्धि
निर्दिशेत् ॥ अथवा षष्ठकस्थाने वयाजं ≡ शकलं भवेत् ॥ विस्तौरकं मौक्तिकं च मुक्ताशुक्तिस्तथैव च ॥ लवणं वंग
नागौ च कंचुकः कागलस्तथा ॥ अथवा षष्ठकस्थाने तु स्तनवारिजकं ≡ भवेत् ॥ वज्रं चैव च रत्नं च प्रवालं त्वपरं
तथा ॥ हरिताल कस्त्वकर्पूरः सुवर्णमुद्रिका तथा ॥ मृन्नीलमृत्तिकापात्रं नीतं चौरेण निर्दिशेत् ॥ अथवा षष्ठकस्थाने तु स्त
हारिलकं ≡ भवेत् ॥ विशिष्टं मौक्तिकं चैव प्रवालश्च विलौरकं ॥ स्वस्तिकाह्वयवेशानं तथैव च हसंतिका ॥ तथोर्णावसनं
चैव पट्टवस्त्रं तथैव च ॥ नीलकाह्वयकं पुस्तं वंगरौप्यं तथैव च ॥ तद्रौप्यमुद्रिकाकारं नीतं चौरेण संदिशेत् ॥ अथवा षष्ठ
कस्थाने चानवेरवारिजं भवेत् ॥ ≡ मृद्वालोष्ठनिकापात्रे मृत्कुंभा च मपाटिका ॥ लोहं चैव तु सूची च नीतं चौरेण निर्दिशे
त् ॥ अथवा षष्ठकस्थाने नकीयलरवदं भवेत् ≡ ॥ साक्षा च कूपी वनारस्थनाम्नं चैव तु पित्तलं ॥ नीतं चौरेण विज्ञेयं यथाह यव
नः पुरा ॥ अथवा षष्ठकस्थाने चानवेदारिवलं ≡ भवेत् ॥ विशिष्टं मौक्तिकं चैव प्रवालं च तथैव च ॥ मुक्ताशुक्तिः काचकू
पीपाषाणं च विलौरकं ॥ अथवा षष्ठकस्थाने भवेदिज्जिमायकं ॥ ≡ रत्नमणिविशेषश्च नीलः पीरोजकस्तथा ॥ पार

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वश्चैव वरौ पंच काग लक्ष्म तथैव च ॥ नीतं चौरेण वक्रस्थं यथाह यवनः पुरा ॥ अथवा षष्ठकस्थाने नरीकं शकलं भवेत् ॥
विद्धौ रकं च वरौ पंच पार रं वस्त्रमेव च ॥ सूत्र रज्ज्वादिकं चैव काग लक्ष्म तथैव च ॥ नीतं वै तस्करेणेति फलं तत्र विनिर्दिशे
त् ॥ अष्टमस्थानशकलाद्रूपं सुरूपं विनिर्दिशेत् ॥ प्रत्यक्ष जनसंघे स्मिन् कश्चौर इति चेद्भवेत् ॥ तदा तु नगरं स्थानं चतुर्थं का
रयेत्पृथक् ॥ चतुर्दिक्षु सभाकार्या ततस्तु रमलं चरेत् ॥ एतस्यां तु दिशायां च तस्करो वर्तते न वा ॥ इति चेति समाधाय चाल
येत्पाशयुग्मकं ॥ ततस्तु रमलं कृत्वा सम्यक् तत्र विलोकयेत् ॥ तस्मात्तत्र यो दशस्थाने दास्विलं चेत्समागतं ॥ तदा तस्यां सभा
यां तु तस्करो वर्तते ध्रुवं ॥ अनेनैव प्रकारेण चतुर्दिक्षु पृथक् पृथक् ॥ रमलं जनयेद्विद्वान् कृत्वा तत्र विचेतनं ॥ तत्राप्येवं
सभायां च चतुर्द्वारं तु कारयेत् ॥ पृथग्दिक्षु समास्थाप्य पूर्ववद्रमलं चरेत् ॥ इयं यावत्तस्करस्य प्राप्तिः स्यात्तावदेव हि ॥
कर्तव्यं च प्रयत्नेन वारं वारं च वै पुनः ॥ एतस्मिन्नपि प्रश्ने च मतं मन्यद्ब्रवीम्यहं ॥ पूर्ववच्छुकलं कृत्वा कुर्याद्रमलसुत्तमं ॥ पु
नस्तत्रापि रमले प्रथमं शकलं तु यत् ॥ द्वितीयं नवमं चैव तथैव च त्रयोदशं ॥ एतेषां मग्नि विंदूनां कार्यं शकलमुत्तमं ॥
69 पुनस्तत्रैव रमले तृतीयं शकलं तु यत् ॥ दशमैकादशे चैव तथा पंचदशे च वै ॥ एतेषां शकलानां च पार्थिवा लिंदवश्च ये ॥
नैरन्यच्छकलं कार्यं तद्द्वितीयं निगद्यते ॥ पुनस्तत्रैव रमले चतुर्थं शकलं तु यत् ॥ षष्ठं च पंचमं चैव तथा षोडशकं च वै

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ ६६ एतेषां जलबिंदूनां कार्यं शकलमुत्तमं ॥ तृतीयं शकलं चैतद्दूमलेनिश्चितं कृतं ॥ पुनस्तत्रैव रमलं सप्तमं शकलं तु यत् ॥
अष्टमं द्वादशं चैव तथैव च चतुर्दशं ॥ एतेषां वायुबिंदूनां कार्यं शकलमुत्तमं ॥ एतच्चतुर्थशकलं ज्ञेयं रमलकोविदैः ॥ श
कलानां चतुष्केस्मिन्नुत्क्षिप्ते निजे गृहे ॥ यत्किंचिच्छकलं चेत्स्यात्तदा तद्द्विशितस्करः ॥ एवं पुनः पुनः कार्यं यावज्जोर
त्वलभ्यते ॥ एतस्य रोगिणो रोगः कोस्तीति यदि पृच्छति ॥ तदातु रमलं कार्यं दृष्ट्वा च प्रयत्नतः ॥ तत्रापि षष्ठकस्थाने
ह्याग्नेयं शकलं भवेत् ॥ तदापि तोद्भवो रोगो दाहश्चसुतरां भवेत् ॥ अथवा षष्ठकस्थाने शकलं वायवीयकं ॥ तदातु
वातरोगः स्यादज्ञानं दृष्टिस्तथैव च ॥ अभिचारोद्भवो रोगः श्रेष्ठकश्चेति निर्दिशेत् ॥ अथवा षष्ठकस्थाने यदाप्यं शकलं भवे
त् ॥ कफोद्भवस्तदा रोगः मेहरोगस्तथैव च ॥ अथवा षष्ठकस्थाने पार्थिवं शकलं भवेत् ॥ तदा रुधिररोगश्च तथा चैवा
स्थिभग्नता ॥ त्वगंतर्गतमेवास्मिस्मृतं चैव मुद्दिशेत् ॥ अथवा षष्ठकस्थाने लह्याणं ॰ शकलं भवेत् ॥ पित्तोद्भवस्तदा
रोगः शिरोरुग्बधिरामयः ॥ ज्वरो दाहश्च तृष्णा च गात्रभेदस्तथैव च ॥ गृहवासरपर्यंतं कष्टमेतस्य वर्तते ॥ अथवा ष राम॰
ष्ठकस्थाने कजहृाखिल ॰ मागतं ॥ तदा तु पेसरोगश्च वातरोगस्तथैव च ॥ कण्ठमन्यमयश्चैव तथैवात्र निगद्यते ॥ र ६६
विवासरपर्यन्तं कष्टं तस्य विनिर्दिशेत् ॥ अथवा षष्ठकस्थाने कजन्त्वारिज ॰ मागतं ॥ कफोद्भूतस्तदा रोगस्तथा पित्तो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ङ्गवश्च वै ॥ हृद्रोगः पार्श्वरुक्तथा चैव चिंता वा मानसी व्यथा ॥ कश्चिद्विचारतो रोग इति तत्र फलं दिशेत् ॥ शनिवासरपर्यं
तं कष्टं तस्य विनिर्दिशेत् ॥ अथवा षष्ठकस्थाने जमाने ÷ शकलं भवेत् ॥ तदा शरीरे रौक्ष्यं च वातव्याधिस्तथैव च ॥ तमक
श्वज्वरश्चैव नाभिरुग्जठरव्यथा ॥ बुधवासरपर्यंतं तस्य कष्टं विनिर्दिशेत् ॥ अथवा षष्ठकस्थाने फरास्वे ÷ शकलं भवे
त् ॥ अशक्तानि च नित्येन तदा रोगः प्रजायते ॥ वातोन्मादो भूतबाधा चाभिचारोद्भवा तु रुक् ॥ चेटकोद्भवरोगश्च शिरोरु
क्पृष्ठरुक्तथा ॥ भृगुवासरपर्यंतं तस्य कष्टं विनिर्दिशेत् ॥ अथवा षष्ठकस्थाने उक्लारत्ने ÷ शकलं भवेत् ॥ तदा रक्तवि
कारश्च शरीरे रौक्ष्यता भवेत् ॥ उच्चस्थानात्पतनं पाषाणाद्वा हननतोपि वा ॥ काष्ठघातेन वा रोग इष्टिकाघाततोपि वा ॥
शनिवासरपर्यंतं तस्य कष्टं विनिर्दिशेत् ॥ अंकीशे ÷ शकलं यदा षष्ठस्थानगतं भवेत् ॥ तदा स्थितिस्थितो रोगः पै
त्तरोगस्तथैव च ॥ अंगमर्दश्च भवति शान्त्यंते कष्टता भवेत् ॥ अथवा षष्ठकस्थाने हुमरा ÷ शकलं भवेत् ॥ तदा सन्ने
हि शरीरं तथा शस्त्रहतं स्तनं ॥ रुधिरस्य विकारस्य जठरांते भवेद्ध्रुवं ॥ भौमवासरपर्यंतं तस्य कष्टं विनिर्दिशेत् ॥
अथवा षष्ठकस्थाने वयाजे ÷ शकलं भवेत् ॥ कफोद्भूतस्तथा रोगः शीतरोगस्तथैव च ॥ सोमवासरपर्यंतं तस्य कष्टं वि
निर्दिशेत् ॥ अथवा षष्ठकस्थाने नुस्रतवा रिज ÷ मागते ॥ तदा ज्वरश्च दाहश्च तापश्च विदेहता ॥ अभिचाराद्यभिहिता

स्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. तथा रुधिरविस्फोटिः॥ नेत्ररोगश्च भवति तत्कष्टं भास्करावधि॥ अथवा षष्ठकस्थाने तुलाद्वितिलः मागतं॥ कफोद्भू
७० तस्तदा रोगो वातरोगस्तथैव च॥ कटिशूलं वातशूलं कफवातोद्भवान्यथा॥ गुरुवासरपर्यंतं तत्कष्टं हि विनिर्दिशेत्॥ औ
नवैरवारिजंः यदा षष्ठस्थानगतं भवेत्॥ तेजोहानिस्तदा तस्य कृत्रिमाद्विषतश्च रुक्॥ भूतबाधा चेष्टकादिरोगो जठररु
ग्भवेत्॥ शनिवासरपर्यंतं तस्य कष्टं विनिर्दिशेत्॥ अथवा षष्ठकस्थाने नकीयलखंडः भवेत्॥ तदा रक्तविकारः स्याज्जठरे
केणकृशथा॥ पामा सर्वशरीरस्य कृत्रिमाद्विषतश्च रुक्॥ रोगस्याच्चिरकालेन प्रमेहो रोगपीडितः॥ भौमवासरपर्यंतं त
स्य कष्टं विनिर्दिशेत्॥ अथवा षष्ठकस्थाने ह्यानवेसारितलं ः भवेत्। तदा तु वातरोगस्य तथा प्रेमनिमित्ततः॥ चिंतया रो
गउत्पत्तिस्तथा भोगस्य चिंतया॥ शीतज्वरश्च भवति तत्कष्टं भास्करावधि॥ इज्तिमायकः संज्ञं वा षष्ठस्थानगतं भवेत्
॥ तदा रक्तो मिघानश्च चेटकं च ध्रुवं भवेत्॥ सप्तांगेषु भवेच्छूलं शोकस्यादुद्दरे ध्रुवं॥ बुधवासरपर्यंतं तस्य कष्टं विनिर्दि
शेत्॥ अथवा षष्ठकस्थाने तरीकः शर्वास्यं भवेत्। तदा तु शीर्षरोगश्च वैकल्यं रुग्णतानतथा॥ भूयोऽङ्गे तस्य च तथा कफरो राम.
गस्तथैव च॥ मंदोदरं भवेत्तस्य यदा स्याच्च प्रवाहिका॥ सोमवासरपर्यंतं कष्टं तस्य विनिर्दिशेत्॥ आरोग्यं रोगिणो भू ७०
यान्नवेति यदिच्छकः॥ तदा तु रमलं कुर्यात्क्रूरकर्मप्रयत्नतः॥ संततः प्रथमे स्थाने रोगिणश्चैव वर्तते॥ षष्ठस्थानस्थ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संबंधो रोगस्यैव हि वर्त्तते ॥ द्वितीयस्थानसंबंधो भेषजस्य हि वर्त्तते ॥ दशमस्थानसंबन्धो वैद्यस्यैव हि वर्त्तते ॥ आरो
ग्यस्य च संबंधस्तथैवैकादशे गृहे ॥ अष्टमस्थानसंबंधो मृत्युना वर्त्तते ध्रुवं ॥ द्वादशस्थानसंबंधश्चिरस्थायी रुजो भवे
त् ॥ अपस्मारं च कुष्ठं च दद्रुरोगः क्षयकामले ॥ दुर्नामग्रहणीत्याद्या दृष्टव्या द्वादशे गृहे ॥ बहुवर्षस्थितानां च संबंधो द्वाद
शे गृहे ॥ स्थाने षष्ठे तृतीये सौम्यं खारिजं शकलं भवेत् ॥ यद्वा सौम्यमुन्कलीबं स्थाने षष्ठे तृजायते ॥ आरोग्यं तु तदा स्याद्धि रो
गिणश्चेति निर्दिशेत् ॥ यद्वा स्थाने षष्ठे तृतीये उक्तारव्यं ÷ शकलं भवेत् ॥ जमानं ≡ च वपाजं ≡ च नकीयलखदं ÷ तथा ॥ हुम
रारव्यं ≡ च शकलं नष्टे वेज्तिमायकं ॥ ≡ नरीका ⁝ नवखारिजं ⁝ कजनखारिजं ≡ कं च वै ॥ तदा तु रोगिणो मृत्युर्निश्चितं ।
स्यान्न संशयः ॥ उक्ताकारः ÷ समुद्दिष्टो यथा मेतो ध्वैदिका ॥ आर्त्तनिगतमस्त्रावज्जमानाकार ≡ मुच्यते ॥ वपाजा
कार ≡ मुद्दिष्टो यथा मेनस वास्तुकं ॥ नकीयलखदाकारो ÷ भवेद्वै गर्भकारवत् ॥ इज्तमाय ≡ स्वरूपं तु मेन शय्यानृती
स्तथा ॥ हुमराकार ≡ मुद्दिष्टः काककोलाहलो यथा ॥ नरीकाकारः मुद्दिष्टः मेन सस्तानकारवंत् ॥ आनवे खारिजा
कारो ⁝ यथा वह्निस्थाने धुतौ ॥ यथा मेन स्ववनितासु कुकेशारुहं निहि ॥ तथान्योपि यथा तद्द्रूस्वरूपं निर्दिशेद्बुधः
॥ कजनखारिजं ≡ रूपं तु श्मशानास्थीनि वह्नवेत् ॥ अन्यच्च नवमस्थाने नरीकं ⁝ शकलं भवेत् ॥ वपाजं ≡ षष्ठकस्थाने

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उत्थाख्यं ≡ चाष्टमे गृहे ॥ इज्जिमापाख्ह्वयं ≡ चैव यदि स्याद्द्वादशे गृहे ॥ अंकीशाख्यं ≡ च शकलं चतुर्थे स्थानकं भवे
त् ॥ आनवेरवारिजं ≡ चैव तथैवैकादशे गृहे ॥ जमातं ≡ प्रथमे स्थाने कुमराख्यश्च मे भवेत् ≡ ॥ एषु स्थानेषु चैतानि संपू
र्णफलदान्यपि ॥ प्रथमात्षष्ठकादौ च कार्यं शकलमुत्तमं ॥ चतुर्थाद्दशमाच्चैव कार्यं शकलमुत्तमं ॥ एतयोरुभयोर्यो
गात्कार्यं शकलमुत्तमं ॥ एतस्माच्छकलाच्चैव फलं वाच्यं मनीषिभिः ॥ एतदुत्पन्नशकलं लह्याणाख्यं ≡ भवेद्यदि ॥
यद्वा तु स्यात्रवारिजं ≡ फराख्यं ≡ चापि चेद्भवेत ॥ तदा शीघ्रतरं तस्य रोगैर्निर्मुक्तता भवेत् ॥ अथवा तत्तु शकलं तु स्तह्याख्वि
लकं ≡ भवेत् ॥ कज्जह्याखिलकं ≡ चैव तथैवानवदाखिलं ≡ ॥ तदा रोग्यं तु कतिचिद्दिवसानन्तरं भवेत् ॥ अथवा तत्तु
शकलं बयाजाख्यं ≡ भवेद्यदि ॥ इज्जमाया ≡ ह्वयं वापि जमाताख्यं ≡ भवेच्च वा ॥ तदा तु चिरकालेन रोगनिर्मुक्त-
ता भवेत् ॥ अथवा तत्तु शकलं कज्जतवारिजकं ≡ भवेत् ॥ आनवेरवारिजं ≡ वापि तदाकस्मान्मृतिर्भवेत् ॥ अथवा
तत्तु शकलमंकीशाख्यं ≡ यदा भवेत् ॥ उत्थाख्यं ≡ कुमरा ≡ ह्वं च चिरेण स्यान्मृतिस्तदा ॥ अथवा तत्तु शकलं
नकीकाख्यं ≡ भवेद्यदि ॥ नकीयत्तरवदं ≡ वापि शकलं तद्भविष्यति ॥ एतयोः साक्षिशकलं सौम्यं चेद्रोगमि
ष्यति ॥ तदा सन्नमृतिर्भूत्वा पुनर्जीवति निश्चितम् ॥ एतयोः साक्षिशकलं क्रूरं चेत्संभविष्यति ॥ तदा दोस्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यतां प्राप्यतनतः पश्चान्नरिष्यति ॥ तासां चैव दासीनां मध्ये श्रेष्ठा क्रियते शुभः ॥ तदा तु रमलं विद्वान् कुर्याच्चैव प्रय
त्नतः ॥ प्रथमाद्दूरशाच्चैव शकलं कार्यमुत्तमं ॥ द्वितीयात्सप्तकाच्चैव कार्यं शकलमुत्तमं ॥ एतयोरुभयोर्योगाच्छकलं
कार्यमुत्तमं ॥ एतस्माच्छकलाच्चैव फलं सर्वं समादिशेत् ॥ तच्चेत्तु स्वद्दा खील ÷ मानवेदा खिलं तथा ÷ ॥ कजद्दा खिल
कं ÷ चैव वयाजारव्यं ÷ तथैव च ॥ इज्जमाना ÷ द्वयं चैव शकलं संभविष्यति ॥ तदा दासीदासगणाः स्थिरपादाः शुभा
वहाः ॥ अथवा तत्तु शकलं लह्याणाख्यं ÷ भवेद्यदि ॥ तुस्त्रतारिजकं ÷ वापि फराख्यवा ÷ भविष्यति ॥ तदा दासीदासग
णाः शुभः स्याच्छुभदायकः ॥ परं तु स्वामिचित्तेन विक्रयश्च भविष्यति ॥ अथवा तत्तु शकलं ह्युल्काख्यं ÷ संभविष्यति ॥ त
कीयलस्तरं ÷ वापि तथा तत्र फलं दिशेत् ॥ दासीदासा मरिष्यंति गमिष्यंति च वा ततः ॥ अथवा तत्तु शकलं नरीकाख्यं ÷ भविष्यति ॥
यद्दा कजलखारीजं ÷ तदा तत्र फलं दिशेत् ॥ दासीदासाश्चरपदा मिथ्यावादिन एव च ॥ अथवा तत्तु शकलं हुमरा ÷ वं
किशं ÷ भवेत् ॥ दासीदासस्तदा सर्वे मरिष्यंति च रोगतः ॥ अथवा तत्तु शकलमातवेखारिजं ÷ भवेत् ॥ दासीपुत्रस्तदा
चेत्स्यान्नरनिंदापरायणः ॥ मिथ्यावादी द्यूतकारी व्यभिचारी च वै भवेत् ॥ अथवा चेद्भवेद्दासी तदा स्याद्व्यभिचारिणी ॥ द्र
व्याशका मपंचाढ्या पलायनपरा भवेत् ॥ अथवा तत्तु शकलं जमानाख्य ÷ — भवेद्यदि ॥ तदा स्थिरा तदा ज्ञेया परं त्वय

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र·सि· ७२

भिचारिणी ॥ प्रपंचकारिणी चैव बहुधा संभविष्यति ॥ काजातिः सेवकस्यास्येत्येवं पृच्छति पृच्छकः ॥ षष्ठकाद्द्वादशाच्चै
व शकलं कार्यमुत्तमं ॥ तस्मात्सर्वं फलं वाच्यमित्याह यवनः पुरा ॥ तच्चेत्यंकीशः कं जातं तदा बर्बरजातिजः ॥ तच्चेदु
ल्लाः ह्वयं जातं तदोदीच्यः स सेवकः ॥ तच्चेत्तकीयल खदं तदास्लमीति निर्दिशेत् ॥ तच्चेदात्तवखारीजं तदा गुर्ज्य
स्ति सेवकः ॥ तच्चेत्करहाः जातं तदाऽऽथैन्यस्ति सेवकः ॥ तच्चेत्तरीकं माख्यातं फिरंगी स्यात्तदा हि सः ॥ कुमरा हं
भवेत्तच्चेत्तदा गुणव्यस्ति सेवकः ॥ ॥ यद्वा खत्तापि जातिः स्यादित्याह यवनः पुरा ॥ तच्चेत्कब्बल खारीजं त
दाजंग्यस्ति सेवकः ॥ अथवा पूर्वे दिक्कं स्यात्सेवको लोति निर्दिशेत् ॥ अथ वै तेषु तद्वसु शकलं स्यान्न किंचन ॥ तदा दा
सस्तु न भवेद्भवेद्दुत्तमजातिकः ॥ केनचित्कारणे नैव वक्तृतो दासतां रयेत् ॥ तदेव जन्मजातं स्यात्तदैतत्तु विनिश्चितं ॥ अजा
ख्यादि चतुष्पात्सु मेलाभो वर्त्तते नवा ॥ इति तत्र कौ प्रश्ने रमलं तु विलोकयेत् ॥ प्रथमात्सप्तकाच्चैव शकलं कार्यमुत्त राम·
मं ॥ तस्मात्सर्वं फलं वाच्यमित्याह यवनः पुरा ॥ एतच्छकलकं चेत्स्यात्तु स्तहा खिलः संज्ञितं ॥ कज्जहा खिलकं ७२
वापि तथैवा तव दाखिलं तदा लाभो भवेन्नूनमेवं तु बहुशो भवेत् ॥ अथवा शकलं तु तत्तु जमाना रवं भवेद्यदि ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इज्ञमायकं३संज्ञंचाववयाजाख्यं३भविष्यति॥तदायद्यस्तितस्यास्तिबहुशोनभवेत्किल॥अथवातत्तुशकलंल
ह्याणाख्यं३भवेद्यदि॥तुरत्नत्वारिजकं३चैवफरहाख्यंभवेद्यदि॥तदासुभावहंतस्यामदंतह्निक्रमोभवेत्॥अथ
वातत्तुशकलंहुमराख्यं३भवेद्यदि॥उत्कार्ख्य३शकलंचैवतथाकजलरवारिजं३॥आतवेरवारिजं३चैवभवेतच्छ
कलंहिचेत्॥तदामृत्युमवाप्नोतियद्वातद्वानिरेवच॥अथवातत्तुशकलंनकीयलरवदं३भवेत्॥नरीकं३वाभवेत्तत्तु
तदानष्टंहतंभवेत्॥अथवातत्तुशकलंमंकीशाख्यं३भवेद्यदि॥तदारोगेणमरणंनिर्दिशेत्स्वचतुष्पदः॥वाजोत्तुरा
वसहिनिसिकरस्यकक्तनरं॥कीरस्यसाइकेताद्याःपक्षिणःसमुदीरिताः॥एतेषांपक्षिणांप्रश्नेरमलंचविलोकये
त्॥अत्रापिपक्षिणांप्रश्नेप्रश्नद्वयमुदीरितं॥उड्डानंकारणंयेषांतेषांचैवसुपक्षिणां॥एकप्रश्नःसमुद्दिष्टस्तेचाप्य
43 न्येसमीरिताः॥वाजोत्तुराचशाहिनिसिकरस्यकक्तनरं॥उड्डानकारिणाएतेपक्षिणःसमुदीरिताः॥वाचैवकारणंये
षांपक्षिणांसमुदीरितं॥तेषांद्वितीयःसंप्रश्नःकथितोयवनैःपुरा॥कुलंकेकुकुराद्याश्चयेचान्येवाग्विलासिनः॥ए
तत्प्रश्नद्वयंप्रोक्तंयवनैर्दैवकोविदैः॥एतत्प्रश्नद्वयेवापिरमलंहिविलोकयेत्॥तत्रापिप्रथमंस्थानंषष्ठकंचविलोकये
त्॥एतत्स्थानद्वयेचेत्स्यात्सौम्यशकलमुत्तमं॥तदालाभोभवेन्नूनंतत्पक्षिविषयस्यच॥उड्डानकारणंयेषांपक्षिणां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ ७३ कथितंपुरा॥ तेषांप्रश्नेकृतेतत्ररमलंहिविलोकयेत्॥ प्रथमात्सप्तकात्स्थैवद्वितीयाद्दशमात्तथा॥ उत्पन्नेशकलेका
र्यंताभ्यामेकंतुकारयेत्॥ तस्मात्सर्वंफलंवाच्यमित्याहयवनःपुरा॥ लह्याणंतुसरवारीजंफराह्नंशकलंतथा॥ ⁝⁝
ततोड्डानंकरिष्यंतितदाचित्रंभविष्यति॥ अथवातत्तुशकलंतुसद्दाखिलकंभवेत्॥ कुत्रद्दाखिलकंवापितथैवातव
दाखिलं॥ ⁝⁝⁝ तदातुमृगयानूनंसुतुद्वावभविष्यति॥ लाभश्चैवभवेन्नूनंनात्रकार्याविचारणा॥ अथवातत्तुशकलं
जमातारव्यंभवेद्यदि॥ जमातंचेज्जिमायंवातदातत्रफलंदिशेत्॥ ⁝⁝⁝ ततोड्डानंकरिष्यंतिसत्वास्यान्मृगयातदा॥
परंतुसुखरूपेणपक्षिणामागमोभवेत्॥ अथवातत्तुशकलमातवेरवारिजंभवेत्॥ तकीयलरवद्वंवापितथोल्कारव्यंभ
विष्यति॥ तथाकज्ज लरवारीजं ⁝⁝⁝⁝ तदातत्रफलंदिशेत्॥ भविष्यंतितदानष्टाःपक्षिणःसर्वएवहि॥ पुनर्नैवहिदृ
ष्टाःस्युरित्याहयवनःपुरा॥ अथवातत्तुशकलमं[illegible]शारवं ⁝ भविष्यति॥ कुमराह्लंभवेद्वापितदातत्रफलंदिशेत्॥ रोगे
णपक्षिणश्चैतेमरिष्यंतीतिनिर्दिशेत्॥ अथवातत्तुशकलंतरीकाःरव्यंभवेद्यदि॥ तदातुपक्षिणोभव्यामृगयाकारिणः॥ राम॰
श्चवै॥ परंतुतेकदाचित्त्वनष्टाःस्युःपक्षिणश्चवै॥ दृश्यानस्तुस्तथाप्येतेलभ्यास्स्युर्यत्ततस्त्विति॥ वाच्यैवकारणंयेषांतेषां ७३
प्रश्नोत्रगद्यते॥ तेचापिपक्षिणःसर्वेंशुकाद्याःसारिकादयः॥ येषांवाणीसुमधुरातेषांप्रश्नःपतत्त्रिणां॥ क्रियमाणेतुसंप्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

74

श्रेरमलं तत्र कारयेत् ॥ प्रथमान्नवमाच्चैव तृतीयात्षष्टकात्तथा ॥ उत्पन्ने शकले कार्ये तयोरेकं तु कारयेत् ॥ तस्मात्सर्वे
फलं वाच्यमित्याह यवनः पुरा ॥ तत्रश्चेच्छकलं जातं लुह्याणारव्यं प्रभो रयं ॥ तुस्तद्दाखिलकं चैव फराह्वं शकलं तथा
आतवेदाखिलं चैव तत्रश्चेच्छकलकं भवेत् ॥ ≡:≡: तदा च स्वरमासाद्य वदंति मधुरो गिरं ॥ अथवा तत्तु शकलं जमात
रव्यं भवेद्यदि ॥ इज्जमायकसंज्ञं वा वयाजं वा तथैव च ॥ ≡:≡ तदास्यात् मधुरावाणी परंनीचश्चरीभवेत् ॥ अथवा तत्तु
शकलं तु स्तत्वारिजकं भवेत् ॥ कज्जदाखिलकं वापि तरीकारव्यं ≡:≡: भवेद्यदि ॥ उच्चैस्स्वरस्तदा भूयात्परं न मधुरं व
चः ॥ अथवा तत्तु शकलं तकीयलरवदं भवेत् ॥ उस्तारव्यं शकलं वापि कज्जत्वारिजकं तथा ॥ ≡:≡: आतवेस्त्वारिजं भ
वापि शकलं तद्भवेद्यदि ॥ म्लानस्वरस्तदा भूयान्मूर्खो सुःपश्विणश्वते ॥ अथवा तत्तु शकलमंकीशारव्यं भवेद्यदि ॥
हुमरारव्यं तु वा भूयात्तदा तत्र फलं दिशेत् ॥ ≡:≡ रोगेण मरणं चस्यान्मार्जारभक्षणं तथा ॥ अथवा तत्तु शकलं कज्जत्वा
रिजकं भवेत् ॥ आतवेस्त्वारिजे ≡:≡ वापि तदा तत्र फलं दिशेत् ॥ उड्डीय पिंजरान्नूनं गमिष्यंति पतत्रिणः ॥ इति षष्ठभ
वनं ॥ अथ सप्तमभवनं ॥ सप्तमं भवनं यत्तु तदत्र मोच्यते मया ॥ सप्तमे भवने प्रश्नो विवाहग्रथनस्य च ॥ दायादानां
तथा नूनमन्योद्यमविभागिनां ॥ स्त्रीभिः शत्रुत्वकरणं विवादकलहादिकं ॥ सप्तमे भवने ज्ञेयं नात्र कार्या विचारणा ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र. सि. विवाहार्थं पृच्छकेन कृतः प्रश्नो यदा भवेत् ॥ तदा तु रमलं कुर्याद्यथाह यवनः पुरा ॥ प्रथमस्थानसम्बन्धो वरस्यैव हि वर्तने
७४ ॥ सप्तमस्थानसंबंधो वध्वा एव हि वर्तने ॥ धनस्थानं वरस्यात्र द्वितीयं स्थानकं भवेत् ॥ अष्टमस्थानकं वध्वा धनस्थानं भवे
द्ध्रुवं ॥ दानस्थानचतुष्के तु सौम्यदाविलकानि चेत् ॥ यद्वापि सौम्यसाक्षीनसंज्ञानि शकलानि चेत् ॥ भविष्यति तदोद्वाहो नि
श्चितं स्याच्छुभावहः ॥ परंतु प्रथमस्थाने सप्तमस्थानकेऽपि च ॥ दृष्टव्यं शकलं यत्स्यात्तस्मात्सर्वं फलं दिशेत् ॥ प्रथमे सप्तम
स्थानेऽकञ्जदाविलकं भवेत् ॥ ⁝ तु सदाविलकं ⁝ वापि तथैवानवदाविलं ॥ ⁝ वयाजं ⁝ वाजमानं ⁝ वानथैवेज्जिमाय
कं ⁝ ॥ तदोद्वाहो हि निश्चितं हि भविष्यति विनिर्दिशेत् ॥ अथवा प्रथमस्थाने सप्तमस्थानके तथा ॥ लह्याणं ⁝ चांकीशं ⁝ वा
पि तथा तुस्लतवारिजं ⁝ ॥ भविष्यति तदा तत्र फलमेवं विनिर्दिशेत् ॥ भवेदुद्वाहसामीप्यं परंतु न भविष्यति ॥ अथवा प्रथ
मस्थाने सप्तमेस्थानकेऽपि च ॥ यदि स्यात्कञ्जरवारीजं ⁝ ह्यानवेरवारिजं ⁝ तथा ॥ तकीयल्लखदं ⁝ वापि हुमरारव्यं तथैव
च ⁝ तदोद्वाहस्तु न भवेदित्याह यवनः पुरा ॥ अथवा सप्तमस्थाने प्रथमस्थानके तथा ॥ उत्कारव्यं ⁝ शकलं चैव नरी राम.
कारव्यं ⁝ च वा भवेत् ॥ फरारव्यं ⁝ शकलं वापि तदा तत्र फलं दिशेत् ॥ भवेन्निश्चितमुद्वाहः परं तस्य वियोगता ॥ न ७४
तस्तु वै स्त्रियो भर्तुः सुखं नास्तीति निर्दिशेत् ॥ अथवा प्रथमस्थाने सप्तमस्थानकेऽपि वा ॥ एकादशे तथा स्थाने श

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कलेदाखिलं भवेत् ॥ तदोद्वाहो निश्चितं स्यादित्याह यवनःपुरा ॥ कथमस्याः स्त्रियः शीलमिति प्रश्ने कृते सति ॥ प्रश्न
मान्सु समासैव शाकलं कार्यमुत्तमं ॥ तस्मात्सर्वं फलं वाच्यं स्त्रीशीलस्य विनिर्दिशेत् ॥ तच्चेच्च शाकलं जानन्तु खद्वावि
ल ः संज्ञितं ॥ कुब्जद्वाखिलकं ः वापि तत्रैवानवमाखिलं ः ॥ तदा सा स्त्री भवेत्तुन्या समृद्धभाग्यभोगिनी ॥ अथवा
नन्तु शाकलं वयाजाख्यं ः भविष्यति ॥ जमाते ः वेज्जिमायं ः वा तदा तत्र फलं दिशेत् ॥ स्थिरपादा भवेत्सा स्त्री सल
ज्जा च विशेषतः ॥ धनधान्यादिसंवृद्धिःकारिणी स्यान्न संशयः ॥ परं तु तत्र चेज्ज्ञातं जमातं शाकलं शुभं ॥ तदा क
न्या बहुतरा भविष्यति न संशयः ॥ अथ वेजतिमायाहे ः तदा पुत्रास्तु भूरिशः ॥ अथवा तत्र वयाजाहे ः कन्याः पुत्रा
स्तथा समाः ॥ अथवा नन्तु शाकलं लह्याणाख्यं ः भवेद्यदि ॥ यद्वा तु सन्नवारीजं ः तदा तत्र फलं दिशेत् ॥ सा स्त्री स्वबुद्धि
भावेन सर्वकार्यं करोति हि ॥ स्वयमेव समस्तानां कार्याणां सिद्धिकारिणी ॥ स्वयमेव हि चाभिज्ञा भाग्यभोक्तालयेव च ॥ अथ
15 वानन्तु शाकलं फराख्यं ः च भविष्यति ॥ तरीकाख्यं ः भवेद्यद्वा तदा तत्र फलं दिशेत् ॥ तदान्यपुरुषासक्ता भवेत्स्त्री व्यभि
चारिणी ॥ सदैव कामदेवस्य क्रीडाखेलनलालसा ॥ भर्तुराज्ञां विनाप्येषा सदान्यगृहगामिनी ॥ अथवा नन्तु शाकलं हमरा
हुं ः भविष्यति ॥ तकीयलखदं ः वापि तदा तत्र फलं दिशेत् ॥ भर्तुर्द्वीपकरी नित्यं सदा कलहकारिणी ॥ अथवा नन्तु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र·सि· शकलमुष्कारव्यं ॥ चेद्भविष्यति ॥ कज्जलतारिजकं वापि तदा तत्र फलं दिशेत् ॥ सा स्त्री म्लानमुखी चैव निर्बुद्धिः कुशला
७५ पिता ॥ अभिष्टा च भवेन्नूनं भर्तुराज्ञाकरी न च ॥ पलायनपरा नित्यमिति तत्र फलं दिशेत् ॥ अथवा तनु शकलं भवेद्दानव
स्तारिजं ॥ भवेद्द्विद्वेषिणी भर्तुः सदैव व्यभिचारिणी ॥ अथवा तनु शकलं मकोशाख्यं ॥ भवेद्यदि ॥ तदा भवेद्द्विवाचाला ।
नित्यं कलहकारिणी ॥ चित्तमध्ये वसेन्नित्यं वैरं तस्या विनिश्चितं ॥ अस्याः स्त्रियः कथं रूपमिति प्रश्ने कृते सति ॥ रमलं तत्र
कृत्वा तु सम्यक्तत्र विलोकयेत् ॥ तत्रापि सप्तमस्थाने शकलं यद्भविष्यति ॥ रूपं तदनुरूपेण वक्तव्यं च मनीषिभिः ॥
जातिर्ज्ञेया द्वयपिता भवेद्यदा कुजातिजा ॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत् ॥ सप्तमाच्छकलाच्चैव तथैव च चतुर्द
शात् ॥ उत्पन्नं शकलं कार्यं प्रयत्नेन मनीषिभिः ॥ तस्मादुत्पन्नशकलात्तथैवैकादशात्पुनः ॥ शकलं कार्यमुत्पन्नं तस्य
यः खेटको भवेत् ॥ फलं तदनुसारेण वक्तव्यं च मनीषिभिः ॥ उत्पन्नं शकलं तनु लह्याणाख्यं ॥ भवेद्यदि ॥ नत्तुद्वावि
लकं वापि तदा तत्र फलं दिशेत् ॥ विद्वेषपीडितानां च सत्कर्मे रतचेतसां ॥ तपस्विनां कुले जाता दयितेति विनिर्दिशेत् ॥ अ
थवा तनु शकलं जमानाख्यं भवेद्यदि ॥ इज्जमायकः ॥ संज्ञं वा तदा तत्र फलं दिशेत् ॥ सर्वज्ञानां च वैद्यानां दैवज्ञानां कलावतां
॥ लेखकानां गृहे जाता दयितेति विनिर्दिशेत् ॥ अथवा तनु शकलं हुमराख्यं भवे ॥ द्यदि ॥ नकीयलखरः ॥ वापि तदा तत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

फलं दिशेत्॥ नस्करस्वामिनां चैव शूद्राणां च कुलेषु च॥ कारागृहस्थितानां च कुले जाते निनिश्चितं॥ अथवा ननुशक
लं वयाजाख्यं ÷ भवेद्यदि॥ तरीकाख्यः भवेद्यद्दानं तत्र फलं दिशेत्॥ धनिकानां च पांथानां कुले वैचित्र्यकारिणां॥ वस्त्रा
दिरंजकानां च कुले जाते निनिर्दिशेत्॥ अथवा ननुशकलं कजद्राविलकं ÷ भवेत्॥ तुस्तन्वारिजकं ÷ वापि तद्दानं तत्र
फलं दिशेत्॥ राजकीयजनानां च श्रेष्ठानां धनिनां तथा॥ कुले जाता च दृष्टिता तद्दैतच्च फलं दिशेत्॥ अथवा ननुशाक
लमुक्तारव्यं हि ÷ भविष्यति॥ भवेद्दैकीशकं ÷ यद्दानं तत्र फलं दिशेत्॥ कुले जाता च नीचानां विष्ठाकर्मकृतां तथा॥ प
रजागृहकर्तॄणां तथा कुग्रामवासिनां॥ कृषीवलानां सदने स्त्री जाते निविनिर्दिशेत्॥ अथवा ननुशकलं कजस्वारिजकं ÷ भ
वेत्॥ अथवा तेक्रवारीजं ÷ तद्दानं तत्र फलं दिशेत्॥ वेदवाह्यकुले जाता तथा जागृतिकारिणां॥ लोहकर्मकृतां चैव नीचवंशो
16 द्भवा भवेत्॥ अथवा ननुशकलं फराख्यं ÷ हि भवेद्यदि॥ तथैवा नवदाख्योलं ÷ तद्दानं तत्र फलं दिशेत्॥ औरंड्डानां कुले जाता त
था स्वरूपमवेश्या॥ कुलपातकुले जाता तथा नैदैकभोगिनां॥ द्वितीयस्त्रीविचारेण कृतः प्रश्नो यदा भवेत्॥ तत्रापि प्रथमा
स्त्री च द्वितीया वा सुखप्रदा॥ इति प्रश्ने कृते तत्र स्मलं च विलोकयेत्॥ प्रथमा तस्य मासाद्वेव कार्यं शकलमुत्तमं॥ एतच्छ
कलसंबंधः पूर्वस्त्रीविषयो भवेत्॥ द्वितीयादष्टमासाद्वे वशकलं कार्यमुत्तमं॥ एतच्छकलसंबंधो द्वितीयस्त्री निमित्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कः॥ यत्तच्छकलस्तुम्मेतु यत्सौम्यं शकलं भवेत्॥ फलं तदनुसारेण वक्तव्यं च विशेषतः॥ पूर्वे स्त्रीविषयं सौम्यं यदि
स्याच्छकलं शुभं॥ तत्र सौम्यं तत्सकाशादेवमेव द्वितीयके॥ इयं स्त्री वर्तते भुक्ता न वेति यदि पृच्छति॥ तदा तु सप्तमस्था
नं द्रष्टव्यं च प्रयत्नतः॥ सप्तमस्थानके चेत्स्याच्छकलं सौम्यदाखिलं॥ केंद्रस्थाने तु शकलं तदेव पुनरागतं॥ केंद्रस्था
न समीपे तु सासिते शकलं शुभं॥ दाखिलं वा साबितं च यदि स्यात्तत्र वै पुनः॥ न भवेद्गुरुदृष्टिश्च गुरुर्दृष्टिश्च वै भवेत्॥ र
मलं तच्च शकलं कुमारात्वं भवेद्यदि॥ तदा सा स्त्री सुभुक्ता स्यादन्यैनैवेति मानवम्॥ अथवा तत्र रमले शकलं कुमाराह्व
यं॥ न भवेद्गुल्माह्वयं च तथैवाकीलकाह्वयं॥ फरात्वं शकलं चैव सान्निध्ये यदि जायते॥ सप्तमस्थानके चैव
खारिजं शकलं भवेत्॥ चरं वा मुन्कलीबोरत्वं यदि स्यात्सप्तमे गृहे॥ तदान्यभुक्ता सा ज्ञेया वनितेति विनिश्चितं॥ अवरोध
स्थिता वेयं वनिता वर्तते न वा॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत्॥ पंचमात्सप्तमाच्चैव शकलं कार्यमुत्तमं॥ तच्चेत्
सौम्यं दाखिलं स्यात्सौम्यं साबितमेव वा॥ तदावरोधसंस्था सा पवित्रा स्यान्न संशयः॥ तदेव शकलं यद्वा सौम्यं खारिजकं
भवेत्॥ यद्वा सौम्यं मुन्कलीबं तदा तत्र फलं दिशेत्॥ अवरोधस्थिता वापि कदाचित्स्मरगा भवेत्॥ अथवा तत्तु शकलं क्रूरं
खारिजकं भवेत्॥ क्रूरं वा मुन्कलीबाख्यं तदा तत्र फलं दिशेत्॥ तदावरोधसंस्थाने पवित्रा न भवेद्ध्रुवः॥ अथवा तत्तु श

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कलंफरास्वं च भविष्यति ॥ ÷ तरीकं ÷ वा नदानत्र विनिर्दिशेद्बुधः फलं ॥ तदा स्यात्परकीयासाचं चलाचेष्टयायुता ॥ विभा
शितां कृते प्रश्ने रमलेनत्र वै लिखेत् ॥ अष्टमाद्दशमाच्चैव रमलेकार्यमुत्तमं ॥ एतदुत्पन्नशकला द्वितीय शकला तथा ॥
उत्पन्नं शकलं कार्यं ततः सर्वं फलं दिशेत् ॥ यदि स्यात्तनुशकलं सौम्यदाखिलसंज्ञितं ॥ सौम्यसाचितकं चैव तदानत्रफ
लं दिशेत् ॥ स्वरूपस्तु तदाभागः पवित्रश्चोद्यमो भवेत् ॥ अथवा तत्तनुशकलं क्रूरं स्यात्मन्कलीबकं ॥ क्रूरं वा खारिजं च स्यात्त
दानत्र फलं दिशेत् ॥ विभागस्तु नियोगेन तदा स्यान्नात्र संशयः ॥ अथवा तत्तनुशकलं कजखारिजकं भवेत् ॥ आतवे खा
रिजं ÷ वा [illegible] स्वं ÷ वा यदा भवेत् ॥ परस्परं तदा तेषां भागिनां कलहो भवेत् ॥ अथवा तत्तनुशकलं नकीयलखदं ÷ भवेत् ॥
अंकीशं ÷ नुसरतं ÷ वा तदानत्र फलं भवेत् ॥ परस्परं भवेद्युद्धं कलहश्च महान्भवेत् ॥ विद्वेषस्य कृते प्रश्ने रमलं हि विलोक—
येत् ॥ प्रथमाच्च सप्तमाच्चैव शकलं कार्यमुत्तमं ॥ एतच्छकलसंबंधः एकस्य च वर्तने ॥ सप्तमाद्दशमाच्चैव शकलं कार्य
मुत्तमं ॥ एतच्छकलसंबंधे विद्विषा सह वर्तते ॥ एतस्मिञ्छकलद्वंद्वे सौम्यं यत्स्याद्बलाधिकं ॥ तद्देशस्त्वशुभस्थाने पु
11 नरागतमस्तिचेत् ॥ तत्रापि च शुभस्थाने केंद्रे वा स्यात्पणफरे ॥ यद्वापणफरे केंद्रे तदेव पुनरागतं ॥ तदा तु न्यो रुकृतोरः
सर्वे भूपादयोपि च ॥ प्रक्षपाते प्रकुर्वंति यस्य स्याच्छकलं शुभं ॥ अतिसौम्यतराणीह शुभसंचेष्टितानि च ॥ पंच वै शकला
नि स्युस्तान्यत्रैव लिखाम्यहं ॥ लह्याणं ÷ नुसरदाखीलं ÷ नुसरतखारिजकं ÷ तथा ॥ आतवे दाखिलं ÷ चैव कजदाखि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र·सि· लवं॥ तथा॥ एतानि शकलानि स्युः पंचसंख्यानि सर्वतः॥ तथैव पंच क्रूराणि क्रूरभावानि चैव हि॥ नान्यप्यत्र प्रलिख्यं ज्ञेयमाहय
७५ वलं स्युमा॥ इला चैव कुजस्वारीजं॥ कुमरा॥ चांकिशं॥ तथा॥ आतचे स्वारीजं॥ चेति पंच क्रूराणि निर्दिशेत्॥ समानं॥
चतरीकं च॥ योगवाही भवेद्ध्रुवं॥ सौम्येन सह सौम्यं स्यात्क्रूरेण क्रूरमेव च॥ तकीयलखदं॥ चैव मध्यकं [illegible] तितं॥ फर
लं॥ [illegible] चैव मध्यसौम्यप्रकीर्तितं॥ इज्जमायाख्य॥ शकलं वयाजाख्यं॥ तथैव च॥ सौम्येन [illegible] साम्यस्यात्क्रूरेण
क्रूरमेव च॥ एतद्द्वयं साविनाख्यं योगवाही निकथ्यते॥ पूर्वोक्तं शकलद्वंद्वं यत्परस्परवैरिणोः॥ तच्चेदिज्जतिमायाख्यं
॥ वयाजवा[illegible]वद्यदि॥ दशमे पंचमे स्थाने तच्चेत्स्यात्पुनरागतं॥ तदा तु न्यायकर्त्तारः सर्वे भूपादयश्च वै॥ पक्षपातं प्र
कुर्वंति यस्येदं शकलं भवेत्॥ अथवोत्पन्नशकलं स्थाने यत्र तु क्षिप्यते॥ तस्मिन्स्थाने तु दशमं तथा पंचदशं तु वै॥
शकलं पुनरायातं यदि तद्धि फलं दिशेत्॥ तदा तु न्यायकर्त्तारः सर्वे भूपादयश्च वै॥ पक्षपातं प्रकुर्वंति यस्येदं शकलं
भवेत्॥ यद्द्वयोस्तु शकले समानगुणलक्षणे॥ यदा तदा भवेन्मैत्री विद्वेषो रुभयोरपि॥ [illegible]तु शास्त्रवादस्य रमलं राम
[illegible]यद्बुधः॥ प्रथमाच्च तृतीयाच्च शकलं कार्यमुत्तमं॥ एतच्छकलसंबंधः पृष्ठकेन सहालि च॥ सप्तमान्नवमाच्चै ७७
व शकलं यद्भविष्यति॥ संबंधस्तस्य संप्रोक्तः प्रतिवादीजनेन च॥ उभयोर्वादिनोरेतद्युद्धकं शकलद्वयं॥ एतद्द्वये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यच्छुकलं लग्नाणाख्यं ⁝ भविष्यति॥ यद्वा तु स्वत्वारीजं ⁝ तु स्वद्वाखिलकं ⁝ तु वा॥ आनवेद्याखिलं ⁝ चैवज
माताख्यं ⁝ तथैव च॥ अथ वेजतिमायाह्व ⁝ तदा तत्र फलं दिशेत्॥ एतच्छुकलसंबंधिपुरुषस्य भवेज्जयः॥ अथ
वैशेतु शकलमुकलाख्यं भविष्यति॥ तत्कीयलरवं ⁝ वापिकजस्वारिजकं ⁝ तथा॥ आनवेस्वारिजं ⁝ वापि तथैवांकी
शसंज्ञकं ⁝॥ तत्संबंधि नरस्यैव फलं तत्र विनिर्दिशेत्॥ भवेद्यदा जयस्तस्य बहु दैन्यमवाप्नुयात्॥ उभयोः शकलेयद्वा
समानेसमलक्षणे॥ यदिस्यातां तदा तत्र मैत्री स्यादुभयोरपि॥ समारब्धे युद्धकाले जयो वापि पराजयः॥ भवेत्तस्येति सं
मश्चेन्नलं हि विलोकयेत्॥ प्रथमस्थानकं चैव द्वितीयस्थानकं तथा॥ तृतीयस्थानकं चैव चतुर्थस्थानकं तथा॥ चतु
र्दशस्थानकं [illegible]ते संभविष्यति॥ एतेषां स्थानकानां च संबंधप्रतिपादितो॥ स्थानं पंचदशं यत्तु तन्मध्यस्थस्य वर्तते
॥ मुद्राधिकारिणश्चैव तत्स्थानं संप्रकीर्तितं॥ एतेषां स्थानकानां तु यत्र स्याच्छुकलं शुभं॥ बलिष्ठस्य जयः स्यात्तत्संबंधि
पुरुषस्य च॥ शकलं पंचदशमं पृच्छकस्थानसंचये॥ यदि स्यात्तु नरा यातं तदा तस्य भवेज्जयः॥ मुद्राधि[illegible]स्याः कुर्युस्तत
स्पापातकं॥ यदिस्यात्पंचदशमं विपक्षस्थानसंचये॥ तदा मुद्राधिकारी स्याद्विपक्षस्य प्रियंकरः॥ मध्यस्थोपि विपक्षस्य
78 पक्षपातकरो भवेत्॥ अथ वा पंचदशमे स्थाने चेत्तु नरागतं॥ नवपंचमदृष्टिः स्याद्वा द्वा लेकादशे भवेत्॥ तस्मि[illegible]भवे
न्मैत्रीपूर्वं वै युद्धकालतः॥ प्रतिवादिजनात्पूर्वं सापि मैत्री भवेद्ध्रुवं॥ तथैव पृच्छकस्यापि स्थानेष्वेतान्निरीक्ष्य तेन पूर्वं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. वच्छुकलं दृष्ट्वा पूर्ववत्फलमुच्चरेत् ॥ अथवा प्रथमं यद्वा शाकलं यत्र योर्दशे ॥ यदि स्यादष्टमस्थाने द्वादशे वा चतुर्द-
७८ शे ॥ पुनरागमने तस्य तथा पंचदशे गृहे ॥ शाकलं सौम्यदारवीलं तदा मैत्री भवेद्ध्रुवं ॥ भवेत्पृच्छकमूलेन मैत्री स्नेहो हि नि-
र्दिशेत् ॥ अथवा सप्तमे चैव तथा चाष्टमकं च वै ॥ प्रथमे नवमे वापि तथैवैकादशे गृहे ॥ यदि स्यात्पुनरायातं तथा पंच-
दशे गृहे ॥ शाकलं सौम्यदारवीलं यदि स्यात्तद्धि तत्फलं ॥ परस्परं भवेन्मैत्री येन तत्फलमुदीरयेत् ॥ पक्षा[illegible]लानां च प्रथ-
मे यत्र योर्दशे तथा विपक्षशाकलानां ह्यष्टमं सप्तम चतुर्दशे ॥ यदि स्यात्पुनरावृत्ते स्थाने पंचदशे शुभे ॥ अथवा दशम-
स्थाने तत्र [illegible] दिशेत् ॥ मुद्राधिकारिहस्तेन भवेन्मैत्रीति निर्दिशेत् ॥ एतेषां शाकलानां च पुनरावर्तनं यदि ॥ एका-
दशे तु [illegible] त्र फलं दिशेत् ॥ मित्रहस्तेन वा तद्वद्धृष्टमूलेन वै तथा ॥ भवेन्मैत्रीति वक्तव्यं हीत्याह यं वनः पुरा ॥ अने-
नैव प्रकारेण यत्रैषां पुनरागमः ॥ तद्भावसदृशं वा[illegible] फलं चेति विनिश्चितं ॥ अथवा तत्तु शाकलं क्रूरखारिजकं भवेत् ॥
॥ क्रूरं च मुन्कलीवं च तदा तत्र फलं दिशेत् ॥ अन्यत्रान्योधिकारी च तयोर्मैत्रीं करिष्यति ॥ अथवा तत्तु शाकलं सौम्यदाखि- राम.
लकं भवेत् ॥ तदा मैत्री भवेन्नूनं तयोः सत्वपरस्परं ॥ प्रथमादष्टमाद्वैव शाकलं कार्यमुत्तमं ॥ यत्किंचित्पृच्छकसंबंधि यद्वा श- ७८
त्रु गृहे स्थितं ॥ इत्यालोक्य ततः पश्चात्फलं तद्वत्तु निर्दिशेत् ॥ अष्टमं शाकलं यद्वा क्रूरं खारिजमागतं ॥ विपक्षस्तु तदा क-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यात्करिष्यति पलायनं ॥ अथवा प्रथमस्थाने क्रूरं रवारिजमागतं ॥ नराकस्मात्पृच्छकस्तु करिष्यति पलायनं ॥ उभयो
र्विशेषो मध्ये यद्भागे द्रुमरा भवेत् ॥ जयस्तस्य भवेन्नूनमिति तत्र फलं दिशेत् ॥ द्रुमरा = कजहावीलं ॥ तथा तु रवनवारि
जं ॥ एतन्मध्ये यदैकं चेद्भवेत्पृच्छकसद्मनि ॥ दशमे पुनरायाते बलिष्ठः पृच्छकस्तदा ॥ एतेषु शाकलेष्वेव यदैकं स्या
द्विपोऽहि ॥ स्थाने पंचदशे चैव पुनरावृत्तिकृद्भवेत् ॥ तदा बलिष्ठः शत्रुः स्यादित्याह यवनः पुरा ॥ प्रथमं शाकलं यद्वा ष
ष्ठस्थानं गतं भवेत् ॥ क्रूरं स्यादथ दिवक्तव्यं रोगी स्यात्पृच्छकस्त्विति ॥ क्षतक्षीणोपि वा भूयादित्याह यवनः पुरा ॥ सप्तमं
शाकलं यद्वा [illegible]ष्टमे तथा ॥ पुनरावृत्तिकृच्चेत्स्यात्क्रूरं चैव विशेषतः ॥ विपक्षस्य भवेद्रोगः सतं चैव भवेद्ध्रुवं ॥ प्रथ
मे मुकुलं यद्वा द्वादशे पुनरागतं ॥ क्रूरं स्याच्चेत्स्वभावेन तदा तत्र फलं दिशेत् ॥ कारागृहनिवासी स्याद्विपक्षो बद्ध एव च
॥ अन्यस्मै तांतरवं वसे यद्दृष्ट्वा फलमादिशेत् ॥ वह्निबिंदुं समादाय प्रथमे शाकले स्थितम् ॥ चतुर्थे [illegible]बिंदं व सप्तमे ज
लबिंदुकं ॥ दशमे पार्थिवं बिंदुं समादाय प्रयत्नतः ॥ एतेषु शाकलं कार्यमेतत्स्यात्पृच्छकस्य च ॥ दशमं शे[illegible]यत्तु तच्छ
४९ त्रोश्चैव वदेत् ॥ एतच्छकलयुग्मे तु यत्स्यात्सोस्य बलाधिकं ॥ तत्संबंधिजनस्यैव विजयः स्यान्न संशयः ॥ चुहारकात
यच्छतं सप्तमेन तु दीरितं ॥ अन्यत्तमगां तरंवच्छे यद्दृष्ट्वा फलमादिशेत् ॥ उम्महानस्य बिंदूनां कार्यं शाकलमुत्तमं ॥ एत

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र·सि· च्छुकलसंबंधः एच्छुकस्यच वर्त्तते ॥ नवा न विंदुभिश्चैकं शकलं कार्यमुत्तमं ॥ एतच्छुकलसंबंधो विपक्षेण च वर्त्तते
७९ एतच्छुकलयुग्मेतु यस्यास्सौम्यं बलाधिकं ॥ नत्संबंधि जनसैव बलं स्याद्विजयस्तथा ॥ उंमहांतं नवांतं च नाभैनस्य
मनस्य च ॥ परस्परं विद्विषयोर्युद्धे शस्त्रमहारकृत् ॥ कथं भवेत्कीदृशं वेदेवं प्रश्ने कृते सति ॥ रमलं तत्र ... स्पष्ट
व्यं च प्रयत्नतः ॥ प्रथमस्थानसंबंधः सैन्यस्य खलु वर्त्तते ॥ तृतीयस्थानसंबंधः शस्त्राणां वर्त्तते ध्रुवं ॥ ... बलस्य निर्बल
नस्य संबंधः स्यात्तृतीयके ॥ चतुर्थे स्थानसंबंधो युद्धभूमेश्च वर्त्तते ॥ पंचमस्थानसंबंधो युद्धोत्साहस्य वर्त्तते ॥ धृष्टतापा
भूरितायाः स्यात् ... र्त्तते ध्रुवं ॥ षष्ठस्थानस्य संबंधो वाहनस्य च वर्त्तते ॥ अश्वानां च गजानां च संबंधः षष्ठके गृहे ॥ सप्त
मस्थान संबंधो वर्त्तते प्रतिपक्षिणः ॥ द्वितीयस्थानसंबंधस्सैन्यस्य प्रतिपक्षिणः ॥ नवमस्थानसंबंधो दूतानां चैव वर्त्तते ॥
शस्त्राणां च संबंधो नवमस्थानगो भवेत् ॥ दशमस्थानसंबंधः शत्रुस्थानस्य वर्त्तते ॥ एकादशस्य स्थानस्य संबंधः शत्रु
सैन्यकं ॥ द्वादशस्थानसंबंधो नगरक्लेशकारकः ॥ विपक्षद्वयसंबंधि स्थानानां यत्र वै शुभं ॥ बलिष्ठं शकलं च स्यात्त
यस्तत्र विनिर्दिशेत् ॥ प्रथमं शकलं यद्वा सप्तमस्थानगं भवेत् ॥ सप्तमं शकलं यद्वा प्रथमस्थानसंगतं ॥ द्वयोः परस्परं राम·
मैत्री युद्धाभावं भविष्यति ॥ अथवा प्रथमस्थाने कुमराशकलं भवेत् ॥ अंकीशं शकलं यद्वा तथैवानवरवाविजं ॥ ≡ ≡ ≡ ७९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कजखारिजकंवापि ÷ शकलंयदिजायते ॥ अष्टमेपुनरायातंतदानत्रफलंदिशेत् ॥ पृच्छकः खड्गघातेननिधनं
प्राप्नुयाद्रणे ॥ अथवाप्रथमस्थानेउत्काचशकलंभवेत् ÷ ॥ नकीयलखर्दं ÷ वापिशकलंयदिजायते ॥ अष्टमेपुन
रायातंदातनत्रफलंदिशेत् ॥ रणमध्येपृच्छकस्तु स्तनयुक्तोभवेद्ध्रुवं ॥ अथवासप्तमस्थानेकुमराशकलंभवेत् ॥ अंकीशंशक
लंयदा ÷ नथैवानवखारिजं ÷ ॥ कजखारिजकं ÷ वापिद्वितीयेपुनरागतं ॥ तदापृच्छकशत्रुश्चखड्गघातान्मृतोभवेत् ॥ अथ
वासप्तमस्थानेउत्कला ÷ शकलंभवेत् ॥ नकीयलखर्दं ÷ वापिद्वितीयेपुनरागतं ॥ तदापृच्छकशत्रुश्चखड्गस्तनयुतोभवेत्
द्वितीयस्थानकेयदाहमरा ÷ शकलंभवेत् ॥ अंकीशं ÷ वापिशकलंतथैवानवखारिजं ÷ ॥ नकीयलखर्दं ÷ वापिकजाखा
रिजकं ÷ तथा ॥ उत्को ÷ शकलंयदाद्वितीयस्थानगंभवेत् ॥ अष्टमेपुनरायातंतदानत्रफलंदिशेत् ॥ पृच्छकस्यचसैन्यंतु
रणमध्येप्रणश्यति ॥ बहुशःसंहृतंचस्याद्दिन्माहयवनःपुरा ॥ अथवाचाष्टमस्थानेकुमरा ÷ शकलंभवेत् ॥ अंकीशं ÷
80 शकलंयदातथैवानवखारिजं ÷ ॥ नकीयलखर्दं ÷ वापितथाकजालखारिजं ÷ ॥ उत्कला ÷ शकलंयदायदिस्याद्दष्टमे
गृहे ॥ द्वितीयेपुनरायातंतदानत्रफलंदिशेत् ॥ शत्रुसैन्यंतुवहुधापंचत्वंप्राप्नुयाद्ध्रुवं ॥ स्तनयुक्तंभवेत्सैन्यंहीन्याहयव
नःपुरा ॥ अथवाप्रथमस्थानेशकलंसौम्यमागतं ॥ दशमेपुनरायातंतदानत्रफलंदिशेत् ॥ पृच्छकस्यजयोभूयादित्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ हयवनःपुरा॥अथवादशमस्थानेशकलंसौममागतं॥सप्तमेपुनरायातंतदानत्रफलंदिशेत्॥अथवासप्तमस्थाने
८० शकलंसौम्यमागतं॥चतुर्थेपुनरायातंतदानत्रफलंदिशेत्॥विपक्षस्यजयोभूयादित्याहयवनःपुरा॥यद्वाचतुर्थभ
वनेशकलंसौम्यमागतं॥सप्तमेपुनरायातंतदापूर्वफलंदिशेत्॥अथवाप्रथमस्थानेशकलंसौम्यदावितं॥सौम्य
सावितंकंवापितल्केंद्रेपुनरागतं॥तस्मात्स्थितेतुसौम्यंस्यात्टक्कुकःस्याज्जयीतदा॥अथवासप्तमस्थानेसौम्यदावित
मागतं॥सौम्यंसावितंकंवापितल्केंद्रेपुनरागतं॥तस्मात्स्थितेतुशुभदंतदाशत्रोर्जयोभवेत्॥अथवाप्रथमस्थानेकुमरा
≡वांकिशं≡भवेत्॥जमातं≡होज्जमायं≡धाहादशेपुनरागतं॥तदाशत्रोर्वधमध्येटक्कुकस्तुमरिष्यति॥अथवासप्तम
स्थानेकुमरा≡वांकिशं≡तथा॥जमातं≡इज्जमायं≡वाषष्ठेपुनरागतं॥तदाटक्कुकवधेतुविपक्षःपतितोभवेत्॥य
द्वाद्वितीयभवनेशकलंसौम्यमागतं॥तच्चकेंद्रचतुष्केतुयदिस्यात्पुनरागतं॥तदाटक्कुकसैन्येतुविजयंप्राप्नुयाद्ध्रुवं
॥यद्वाद्वितीयभवनेशकलंक्रूरमागतं॥पणफरेपुनरायातंतदानत्रफलंदिशेत्॥टक्कुकस्यचसैन्यंतुपलायनंप राम॰
रंभवेत्॥अथवाचाष्टमस्थानेशकलंसौम्यमागतं॥चेत्केंद्रेपुनरायातंतदानत्रफलंदिशेत्॥विपक्षस्यचसैन्यंतु ८०
प्राप्नुयाज्जयमुत्तमं॥अथवाचाष्टमस्थानेशकलंक्रूरमागतं॥पणफरेपुनर्यातंतदानत्रफलंदिशेत्॥तदाविप

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वसैन्यं तु पलायनपरं भवेत् ॥ क्रूराणि शकलान्यत्र लिखंते प्रश्नकारणात् ॥ कुमराउकला चैव तथैवांकीशकं च वै ॥ न
कीयलस्वरं चैव कजरवारिजकं तथा ॥ आतवेरवारिजं चैव तुस्तरवारिजकं तथा ॥ ⁝ ⁝ ⁝ ⁝ ⁝ ⁝ एतानि शकलानि सु
र्यस्य पक्षे विनिश्चितं ॥ न स्वसैन्यं तदाज्ञेयं पलायनपरं भवेत् ॥ सौम्यानि शकलान्यत्र लिखंते प्रश्नकारणात् ॥
लह्याणं तु स्त्रदाखीलं कजदाखिलकं तथा ॥ आतवेदाखिलं चैव ववयाजारखं तथैव च ॥ ⁝ ⁝ ⁝ ⁝ ⁝ एतानि श
कलानि सुर्यस्य पक्षे विनिश्चितं ॥ जयः स्यात्तस्य सैन्यस्य यवनैर्नेरितं यथा ॥ फरारवं चतंरीकं च ⁝ ⁝ यस्य प
क्षे भविष्यति ॥ तत्सकाशाद्भवेन्मैत्री करभारं च दास्यति ॥ युद्धेन परितप्तः सन् न च युद्धं करिष्यति ॥ अथवा यस्य पक्षे
तु जमाने ⁝ वेज्जिमायके ⁝ ॥ यदा घातं न दातव्यं प्रपंच कपटं भवेत् ॥ शत्रोः प्रपंचं कुर्वंति फलमेतद्विनिर्दिशेत् ॥ यद्य
मध्ये कसुन योऽस्मिन् यारमलं चरेत् ॥ तत्रापि दशमस्थाने यत्र स्थाच्छुकलं शुभं ॥ पुनरावृत्तिकस्तत्र जयस्तत्र भविष्य
ति ॥ रमलेष्वशुभे योऽस्मिन् सौम्यं पंचदशं भवेत् ॥ उभये त्र पुनर्योगे तदा मैत्री विनिर्दिशेत् ॥ उभयत्रापि चेत्क्रूरं शकलं यदि
जायते ॥ परस्परं तदा नाशो जयश्चान्यस्य वै भवेत् ॥ इति सप्तमभवनं ॥ अथाष्टमभवनम् ॥ अष्टमे भवने यत्तु तत्र प्रश्ना
भवंति ये ॥ तानत्र कथयिष्यामि यथाह यवनः पुरा ॥ भयस्य विघ्नस्य च दुःखराशेर्मृत्योश्च पित्रादि धनस्य चैव ॥ वध ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र·सि· स्वचप्रश्नवरानमश्व भिर्विलोकनीयाः सद्मने मेदि ॥ परचक्रभयस्यैव परिप्रश्नः कृतो भवेत् ॥ रमलं तु तदा कुर्यात्प्रय-
८० त्नेन विचक्षणः ॥ कृते तु रमले तस्मिन्स्थानान्येतानि लोकयेत् ॥ प्रथमे च चतुर्थे च पंचमे सप्तमे तथा ॥ अष्टमे द्वादशे
चैव तथैव च त्रयोदशे ॥ षोडशे दशमे चैव यदि स्युः शकलानि च ॥ तुस्लनखारिजकं चैव ÷ कज्जदाखिलकं ÷ तथा ॥ हु
मराह्वं च ≡ जमातं ≡ तथैवेज्जतिमायकं ≡ ॥ अंकीश ≡ सुकला ÷ चैव नकीयलख्वदं ÷ तथा ॥ कब्जखारिजकं ÷ चैव
तथैवान्तवखारिजं ≡ ॥ एतानि शकलानि स्युः पूर्वोक्तस्थानसंचये ॥ तदा तु परचक्रं च निश्चयेनागमिष्यति ॥ अत्रापि
केंद्रभवनेक्रूराणि शकलानि चेत् ॥ बहुधोपद्रवं तर्हि परसैन्यं करिष्यति ॥ देशोद्वासं तथा कुर्यात्परचक्रं न संशयः ॥ च
तुर्थस्थानकं यद्वा पंचमस्थानकं तथा ॥ प्रथमस्थानकं यद्वा यदि स्युः शकलान्यरः ॥ हुमरा ≡ उकला ÷ चैव शकलं च त-
थांकिश ≡ ॥ आतवेखारिजं ≡ चैव जमानाख्यं ≡ तथैव च ॥ एतानि शकलानि स्युः पूर्वोक्तस्थानसंचये ॥ तदा तु परचक्रे
हि बहुधा भयमुच्यते ॥ चतुर्थस्थानके यद्वा पंचमस्थानके तथा ॥ एकादशे तथा स्थाने द्वादशे स्थानके तथा ॥ स्थाने पं- राम
चदशे चैव षोडशस्थानके तथा ॥ सौम्यानि शकलानि स्युस्तथा पंचदशे गृहे ॥ यदि स्याच्छकलं सौम्यं तथा चैव तु सप्तमे ॥ ८१
अष्टमे दशमे चैव त्रयोदशगृहे तथा ॥ चतुर्दशे स्थानके च क्रूराणि शकलानि चेत् ॥ तदा तु परचक्रं हि पराहतिं गमिष्यति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मार्गमध्याच्चवा न तु भविष्यति पलायितं ॥ अथवा प्रथमस्थाने त्रयोदश गृहे तथा ॥ चतुर्दशे स्थानके च तथा पंचदशे
गृहे ॥ षोडशे स्थानके चैव यदि स्युः शकलान्यदः ॥ कुमरा ≡ चांकीशं ≡ चैव यदा चातवस्ता रिजं ⋮ ॥ नकीयलखदं ÷ चा
पियदोल्का स्वं ÷ भविष्यति ॥ तदा तु परचक्रं हि गत्वा स्वास्तु न रागतं ॥ अथवा प्रथमस्थाने सप्तमस्थानके तथा ॥ न
वमस्थानके चैव दशमस्थानके तथा ॥ षोडशस्थानके चैव यदि स्युः शकलान्यदः ॥ आग्नेयानि तथा चैव वायवीयानि
भूरिशः ॥ तदा तु परचक्रं हि गत्वापि पुनरागमत् ॥ अथ विघ्ननिमित्तं तु कृते प्रश्ने विचारयेत् ॥ रमलं तु प्रयत्नेन तत्र स्थाना
82 नि लोकयेत् ॥ प्रथमे चाष्टमे चैव नवमे दशमे तथा ॥ सौम्यानि शकलानि स्युर्यत्र हि फलमादिशेत् ॥ पृच्छकस्य भयं ना
स्ति निर्भयश्च भविष्यति ॥ अथवा तत्र रमलं जमातं ≡ कुमरा ≡ तथा ॥ उक्ला ÷ नकीयलखदं ÷ आतवेस्ता रिजं ⋮ तथा
॥ अंकीशं ≡ शकलं चैव बहुशः पुनरागतं ॥ यदि तत्र हि फलं वा चं पृच्छकस्य भयं भवेत् ॥ अथवा चाष्टमस्थाने लह्याणं
शकलं भवेत् ⋮ ॥ फरा स्वं ÷ तु सल्हा खीलं ÷ तथैवातवृदा खिलं ⋮ ॥ बयाजं शकलं चैव ≡ यदि स्यादष्टमे गृहे ॥ एतच्छ
कलमध्ये तु यत्किंचिच्छकलं भवेत् ॥ स्थाने पंचदशे चैव तदा तस्याद्भयं बहु ॥ यदा चतुर्थे भवने षष्ठस्थाने तथैव च ॥
अष्टमस्थानके चैव शकलं क्रूरमागतं ॥ तदा भयं बहुतरं पृच्छकस्य भविष्यति ॥ अथवा द्वादशमस्थाने तरीकं ⋮ शकलं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भवेत्॥नकीयलखदं÷ चापिउकलाख्यं÷ तथैवच॥ आनवेखारिजं÷ चैवतथैवद्रुमराहयं॥ अंकीशं÷ शकलंचैवयदि

स्यादष्टमेगृहे॥प्रथमेपंचदशमेपुनराहृतिकस्तथैवै॥मृत्युरेवभयंस्याद्वा यावद्रुधिरनिर्गतिः॥ तावद्भयंचभवतिपृच्छ
कस्येहसंवदेत्॥अथवाप्रथमस्थानेजमातं÷ द्रुमराथबा÷॥जायतेपंचदशमेनदेवपुनरागतं॥अष्टमेकूरशकलमु
मर्हानेपुनर्गतं॥कंठनालछेदनातंपृच्छकस्यमृत्युंभवेत्॥अत्रैवकेंद्रभवनेयदिस्यात्पुनरागतं॥हस्तकर्तनपर्यंतंतदा
विघ्नसमादिशेत्॥अथवाकजहाखीलं÷पष्ठस्थानगतंभवेत्॥अष्टमस्थानकंयद्वानवमस्थानगंतुवा॥द्वादशस्था
नकंयद्वापुनराहृतिकद्वयेत्॥धनहानिःपृच्छकस्याननिश्चितंहिभवेद्ध्रुवं॥अंकीशं÷ शकलंयद्वाद्वितीयस्थानगंभवेत्
॥अष्टमेषष्ठकेवापियद्वापिदशमेतथा॥पुनराहृतिकश्चैवतदातत्रफलंदिशेत्॥पृच्छकस्यधनेचैवंतदाहानिंगमिष्य
ति॥अत्रपंचदशेस्थानेयदितुलहाखिल÷॥सर्वत्रपृच्छकस्यैवनिश्चितोहिभवेद्ध्रुवं॥द्वादशस्थानगंयद्वाशकलंप्रथमे
भवेत्॥प्रथमेशकलंयद्वाद्वादशस्थानगंभवेत्॥तस्त्वेकूरंहिशकलंतदातत्रफलंदिशेत्॥कारागृहाणिनिर्बंधस्तदा
स्यात्पृच्छकस्यच॥इदमेवापिशकलमंकीशाख्यंभवेद्यदि॥शृंखलाबंधनंचैवगलेसाम्भादयोस्तथा॥पृच्छकस्येतिवि
ज्ञेयलोकेवेडीतिनामतः॥अथवानत्रुशकलमुकलाख्यं÷भविष्यति॥नकीयलखदंयद्वा÷तदातत्रफलंदिशेत्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कथा घाते स्वाऽपमानं पृच्छकस्येति निश्चितं ॥ अथवा तत्तु शाकलं डमराख्यंः भविष्यति ॥ आनवेरवारिजंः वापि तदा तत्रफ
लं दिशेत् ॥ अग्निना दह्यते चैव पृच्छकस्येति निश्चितं ॥ अथवा तत्तु शाकलं कजरवारिजकंः भवेत् ॥ तुरवरवारिजकंः
वापि तरीकाख्यंः भवेद्यदि ॥ पृच्छकस्तु तदा नूनं जलमध्ये भयं लभेत् ॥ अथवा मूलिकाप्रोतो भवेदिति विनिश्चितं ॥ म
रणं किंनिमित्तेन भवेदिति विनिश्चितं ॥ पृच्छकः पृच्छति तदा रमलं हि विलोकयेत् ॥ चतुर्थे शाकलं चैव तथैवाष्टमसंज्ञकं ॥ उभयो
योगगतश्चैव शाकलं कार्यमुत्तमं ॥ किंसंज्ञं शाकलं तत्तु सम्यक्युक्तिं विलोकयेत् ॥ तस्मात्सर्वं फलं वाच्यमित्याहुर्यवनाः पु
रा ॥ यदि तच्छकलं भूयात्तुरवरवारिजंः संज्ञकं ॥ लक्ष्माणं वा भवेत्तर्हिः फलमेतद्धि निर्दिशेत् ॥ विदेशे मरणं च स्याद्दक
स्मादिति निर्दिशेत् ॥ अथवा तत्तु शाकलं कजरवारिजकंः भवेत् ॥ आनवेरवारिजंः वापि तदा तत्रफलं दिशेत् ॥ विदेशम
रणं च स्याद्दारिद्र्येण च दीनवत् ॥ अथवोच्चस्थलात्पाताद्भविष्यति विनिश्चितं ॥ अथवा तत्तु शकलमानवेदाखिलंः भवेत् ॥
तुरवदाखिलकंः वापि कजदाखिलकंः तथा ॥ तदा तु मरणं भूयात्स्वगृहे शूलयोगतः ॥ परं तु सुखरूपेण संपन्नीकृतयो
गतः ॥ अथवा तत्तु शकलमंकीशाख्यं भवेद्यदिः ॥ तदा तु मरणं वाच्यं स्वगृहे शूलयोगतः ॥ यद्वा कारागृहे भूयात्पृच्छकस्ये
ति निर्दिशेत् ॥ अथवा तत्तु शकलं फरहाख्यं भवेद्यदि ॥ तरीखं वा तदा तत्र फलमेतद्धि निर्दिशेत् ॥ मार्गमध्ये भवेन्मृत्युर्वि
दोषकृतकोपतः ॥ चित्तसंतापतश्चैव मरणं स्याद्धि निश्चितं ॥ अथवा तत्तु शकलं मुकलाख्यंः भवेद्यदि ॥ नकीयलखं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. ॰वापि नदानक्षफलं दिशेत्॥ भवेन्मृत्युर्मार्गमध्ये क्रोधात्पश्चात्सुतापनः॥ कृशाघातेन वाचैव तथा व्याघ्रादिभक्ष-
८३ णैः॥ अथवा तनुशोकलं वयाजाख्यं॰ भवेद्यदि॥ इज्ञमायात्वयं चैव ॰जमाख्यं ॰तु वा भवेत्॥ तदा मृत्युः स्वके गे-
हे भवेत्तस्य विनिश्चितं॥ कुजेप्युपाये बहुशो न भवेद्रोगसंस्रयः॥ अकस्मान्मरणं च स्यादित्याह यवनः पुरा॥ अथवा
तनुशाकलं कुमराख्यं॰ भवेद्यदि॥ तदा स्वगेह एव स्यान्मृत्युः शस्त्रादियोगतः॥ स्नानादिना च रोगेण मार्गरोधकहस्त-
तः॥ यद्वा चौरकरेणैव यद्वा व्याघ्रादिभक्षणैः॥ अथवा विषयोगेन सर्पदंशेन वा पुनः॥ एतस्य शाकलस्यैव पुनरावृ-
त्तिरादरात्॥ विलोकनीयः प्रयत्नेन यस्मिन्स्थाने स्थयो ध्रुवं॥ तन्वादिस्थानयोगेन फलमेतद्विनिर्दिशेत्॥ तनुस्था-
ने स्वनक्षैव धनस्थाने धनाद्भवेत्॥ सहजस्थानगे चैव सहजान्मृत्युरेव च॥ एवं स्थानानुमानेन सकलं फलमादि-
शेत्॥ शाकलं प्रथमस्थाने पुनरागतमस्ति चेत्॥ दुःखस्य स्यात्क्रोधचिंतायायोगान्मृत्युः स्वयं भवेत्॥ द्वितीयस्थानगं
चेत्स्याच्छकलं पुनरागतं॥ धनाच्च धनिकाच्चैव मन्येभ्यो मरणं दिशेत्॥ तृतीयस्थानकं चेत्स्याच्छकलं पुनरागतं॥ बं- राम.
धुभ्यो भगिनीभ्यश्च सुहृद्भ्यश्च तथैव च॥ समीपयात्राचलनान्मरणं स्याद्विनिश्चितम्॥ चतुर्थस्थानगं चेत्स्याच्छकलं ८३
पुनरागतं॥ पितृहृन्निमित्तेन तथा स्थाननिमित्ततः॥ देशादिकनिमित्तेन भवेन्मृत्युरितीरयेत्॥ यदि च पंचमस्थाने

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शकलं पुनरागतं ॥ तदा पुत्रात्प्रेमपात्रात्तथा काशकलात्त्व वै ॥ भवेन्मृत्युर्विनिश्चित्य यथाह यवनः पुरा ॥ अथवा षष्ठ
कस्थाने शकलं पुनरागतं ॥ स्त्रीजनाद्वैरभावाच्च नरो मृत्युं गमिष्यति ॥ धनादिहृतियोगेन नष्टत्वं चौर्यकर्मणः ॥ अ
थवा नवमस्थाने शकलं पुनरागतं ॥ तदा यात्राप्रसंगेन अर्थेनोद्देशतश्च वै ॥ शस्त्रादिकनिमित्ते भवेन्मृत्युर्विनिश्चितं
॥ अथवा दशमस्थाने शकलं पुनरागतं ॥ तदा व्यापारतश्चैव राजतो मातृतश्च वै ॥ मरणं च भवेन्नूनमित्याह यव
नः पुरा ॥ अथ वैकादशस्थाने शकलं पुनरागतं ॥ पुत्रबंधनिमित्तेन तथा स्थूलचतुष्पदात् ॥ कुत्रापि शकलं
न स्यात्पुनरावृत्तिकद्यदि ॥ तदा तु शुक्लपक्षेण स्थानान्तं वै फलं दिशेत् ॥ [illegible]ने धनस्य च मप्रश्ने कृतेरमलं वीक्ष्य येत्
॥ प्रथमाच्छकलाच्चैव तथैव च चतुर्दशात् ॥ उत्पन्नं शकलं कार्यं प्रयत्नेन मनीषिभिः ॥ उत्पन्नादष्टमाच्चैव शकलं
कारयेद्बुधः ॥ तस्मात्सर्वं फलं वाच्यमित्याह यवनः पुरा ॥ तच्चेद्दाखिलकं सौम्यं यदा भवति निश्चितं ॥ तथा चतुर्दशी
लं ः कअह्दाखिलकं च वै ॥ ः आनवेद्दाखिलं ः चैव तदा तत्र फलं दिशेत् ॥ [illegible]ष्यादिकं धनं चैव मित्रत्वे नागमिष्यति ।
84
अथवा तनुशकलं मंकीशारव्य ः भवेद्यदि ॥ तदा कृच्छ्रात्कष्टतरं लभेद्धृति धनादिकं ॥ अथवा तनुशकलं फराख्य ः
वातरीकं ः ॥ तदा किंचित्समागच्छेत्किंचिन्नैव तिनिर्दिशेत् ॥ अथवा तनुशकलं जमाताख्यं ः भवेद्यदि ॥ इज्जमा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. याहयं३ चैववयाजास्वं३ तथैवच ॥ नदाविलंबमेवस्यान्नात्रकार्याविचारणा ॥ अथवातनुशकलंलग्नाण
८४ स्वं३ भवेद्यदि ॥ तस्मात्स्वारिजकं३ वापितदातत्रफलंदिशेत् ॥ एककःसर्वमेवेहत्यजेद्वृत्तिधनादिकं ॥ अथवा
तनुशकलमातवैस्वारिजं३ भवेत् ॥ कजस्वारिजकं३ वापिनकीयलस्वदं३ तुथा ॥ उकला३ कुमरा३ हवानदावृत्तिध
नाधिकं ॥ नागच्छेन्नहितज्ञायेकं तंवृत्तिधनादिकं ॥ अथवाद्वितीयस्थानेसौम्यदाखिलमागतं ॥ अष्टमेसौम्यखारीजंत
दातत्रफलंदिशेत् ॥ अनायासात्समागच्छेत्तदावृत्तिधनादिकं ॥ अथवाद्वितीयभवनेक्रूरदाखिलमागतं ॥ अष्टमेक्रू
रखारीजंतदातत्रफलंदिशेत् ॥ अतिकष्टाद्भवेत्प्राप्तंतदावृत्तिधनादिकं ॥ यद्वाद्वितीयभवनेदाखिलंशकलंभवेत् ॥
अष्टमेचैवदाखीलंतदातत्रफलंदिशेत् ॥ कदापिनलभेन्नूनंतदावृत्तिधनादिकं ॥ यदिवाप्राप्नुयान्नूनंतदानुकलहेनवै
॥ यद्यद्वितीयभवनेतथैवाष्टमकेपिच ॥ स्वारिजंशकलंचस्यात्तदातत्रफलंदिशेत् ॥ उभयोरपिचेन्नेश्वधनस्यचव्ययो
भवेत् ॥ नभवेदुभयोःकार्यंतदावृत्तिधनादिभिः ॥ इत्यष्टमभवनं ॥ अथनवमभवनम् ॥ नवमंभवनंयत्तुतद्दिशानी
मिहोच्यते ॥ प्रश्नःपांथस्ययात्रायामृणप्रश्नस्तथैव ॥ धर्मशास्त्रस्यचप्रश्नःप्रश्नोवैनिधनस्यच ॥ न्यायोपार्जितवित्तं राम.
चदैवात्मानोभविष्यति ॥ तन्मस्त्रश्चनयादानप्रश्नश्चैवशुभावहः ॥ पिण्डदानस्यचप्रश्नोरात्रिस्वप्नस्यचैवहि ॥ प्र ८४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रश्नो निरूप्यते त्रैव नवमे भवने शुभे ॥ प्रथमस्थानशकलं सौम्यदाखिलकं भवेत् ॥ तदैव शकलं भूयो दशमे पुनरागा
तं ॥ अथवा दशमस्थानाधिपस्य शकलं भवेत् ॥ प्रथमस्थानके चेत्स्यात्तदा तत्र फलं दिशेत् ॥ शीघ्रमेव परावृत्त्य पांथ
श्चैवागमिष्यति ॥ अथवा प्रथमस्थाने शकलं सावितं भवेत् ॥ चतुर्थे वा सप्तमे वा पुनरागतमस्ति चेत् ॥ तदा तु चिरका
ले न पांथस्यागमनं भवेत् ॥ तथैव संस्थितः पांथः पश्चाच्चैव चलिष्यति ॥ अथवा प्रथमस्थाने सौम्यं दाखिलमागतं ॥
यद्वा सौम्यमुन्कलीबं पुनरागतमस्ति चेत् ॥ पंचमस्थानके यद्वा तथैवैकादशे गृहे ॥ तदा पांथास्समाचारः पत्रं चैवाग
मिष्यति ॥ अथवा प्रथमस्थाने सौम्यदाखिलमागतं ॥ सौम्यं च मुन्कलीबं च तत्रैव स्यात्पुनरागतं ॥ तृतीये नवमे वा
पि तदा तत्र फलं दिशेत् ॥ मार्गमध्ये समायाति पांथ एवं समादिशेत् ॥ अथवा प्रथमस्थाने क्रूरं शकलमादिशेत् ॥
द्वितीये षष्ठके चैव तथैवैकादशे गृहे ॥ द्वादशस्थानके चैव पुनरागतमस्ति चेत् ॥ तदा पांथो दूरमार्गे दुःखी शोकी निरा
श्रयः ॥ वर्त्तते फलमेतद्धि वक्तव्यं च मनीषिभिः ॥ प्रथमान्नवमाच्चैव शकलं कार्यमुत्तमं ॥ उत्पन्नं शकलाद्दस्मात्तथा
85 पंचदशाद्ध्रुवै ॥ उत्पन्नं शकलं कार्यं तस्मात्सर्वं फलं दिशेत् ॥ एतच्छकलकं चेत्स्याल्लह्याणाख्यं सुशोभनं ॥ तदा
पांथः परावृत्त्य चिरेणैवागमिष्यति ॥ अथवा तत्तु शकलं कब्जुदाखिलकं भवेत् ॥ तदा पांथः शीघ्रमेव निजं वेश्म

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰ सि॰ गमिष्यति॥अथवा तत्तु शकलं कज्जरवारिजकं भवेत्॥ तदा कृच्छ्रेण वै पांथः सदनं वा गमिष्यति॥अथवा तत्तु शकलं ज-
८५ मातारव्यं भवेद्यदि॥अलभ्यलाभवान्पांथः तदा गच्छेत्त्वरेण वै॥अथवा तत्तु शकलं फराख्यं चेद्भविष्यति॥धनपु-
त्रादिकं पांथः प्रेषयिष्यति सत्वरं॥अथवा तत्तु शकलं सुकलाख्यं भवेद्यदि॥तदा पांथः परावृत्य रोगयुक्तो गमि-
ष्यति॥अथवा तत्तु शकलं मंकीशाख्यं भवेद्यदि॥तदा पांथः परावृत्य शोकचिंतासमाकुलः॥परावृत्य समागच्छे-
च्छीघ्रमेव न संशयः॥अथवा तत्तु शकलं दुमराख्यं यदा भवेत्॥चिरकालेन वै पांथस्तदा गच्छेन्निजं गृहं॥अथ-
वा तत्तु शकलं नुस्रत्खवारिजकं भवेत्॥वार्तापत्रादिकं पांथः प्रेषयिष्यति वै तदा॥अथवा तत्तु शकलं नुस्रद्दाखिल-
कं भवेत्॥तदा पांथः परावृत्य मार्गमध्ये विनिश्चितं॥अथवा तत्तु शकलं ह्यातवेरवारिजं भवेत्॥निर्द्धनः संस्तथा
पांथो विमनस्कश्च वै भवेत् अथवा तत्तु शकलं नकीयलखदं भवेत्॥तदा मार्गात्परावृत्य पांथश्चैवागमिष्यति॥अ-
थवा तत्तु शकलं मिजत्तमायाह्वयं भवेत्॥तदा सांसारिकात्कार्यान्मग्नः स्यात्पांथ एव हि॥चिरकालेन सदने समाग- राम॰
च्छेदिति स्फुटं॥अथवा तत्तु शकलं नरीकाख्यं भवेद्यदि॥तदा पांथो मार्गमध्ये समागच्छति निश्चितं॥अथवा निश्चयं ८५
कुर्यात्सागमिष्यति संदिशेत्॥प्रथमाद्धि चतुर्थात्तु शकलं कार्यमुत्तमं॥सप्तमाद्दशमाच्चैव कार्यं शकलमुत्तमं॥उभ-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योर्योगतः कार्यमन्यच्छकलमुत्तमं ॥ तस्मात्सर्वफलं वाच्यं सौम्यक्रूरादियोगतः ॥ क्रूरे क्रूरं शुभे सौम्यं दाविलेप्राप्ति
कारकं ॥ खारिजे व्ययकारी स्यात्साविते स्थिरमेव च ॥ मुन्कलीवे पराट्टत्तिसूचकं चैव मादिशेत् ॥ प्रश्नः कृतश्चेद्यात्रा
यारमतं तत्र चालयेत् ॥ तत्र यत्प्रथमस्थाने पृच्छकस्य तु तद्भवेत् ॥ सप्तमस्थानसंबंधः प्रोच्यते त्रविशेषतः ॥ यात्राप्रसं
गाक्रमने यस्मिन् स्थाने भविष्यति ॥ तस्य स्थानस्य संबंधः प्रोच्यते सप्तमे तथा ॥ यात्राप्रसंगाक्रमनं यस्मिन्संबंधिगं भवे
त् ॥ तस्यापि चैव संबंधः सप्तमस्थानके भवेत् ॥ अष्टमस्थानसंबंधः पृच्छकस्य धनेन च ॥ तस्मिन्स्थाने निवासेषु संबं
धः पंचमे भवेत् ॥ तत्स्थानेऽरिपुसंबंधः षष्ठस्थाने नृपे भवेत् ॥ यात्रामार्गादिसंबंधो नवमस्थानके भवेत् ॥ पराह्नस्यागम
स्यैव संबंधो दशमे भवेत् ॥ परिपाकस्य च स्थाने संबंधो दशमे भवेत् ॥ एतेषु स्थानसंबंधे क्रूरं नश्[illegible]कलं भवेत् ॥ तदा सर्वं
समीचीनमित्याहयवनः पुरा ॥ अथवा प्रथमस्थाने तृतीये वा चतुर्थके ॥ नवमस्थानके चैव लह्या पंशकलं भवेत् ≡ ॥ तु
स्लखारिजकं चैव = तरीकः चफराहूपं ÷ ॥ एकं वा हित्तयं वापि तृतीयं वा भविष्यति ॥ अथवा प्रथमस्थाने पूर्वोक्ते शक
ले भवेत् ॥ पूर्वोक्ते षेवगेहेषु यदि स्यात्तु नरागतं ॥ तदा यात्रां प्रकुरुते पृच्छकः शीघ्रमेव हि ॥ सुखरूपेण संगच्छेन्मार्ग
मध्ये विनिश्चितं ॥ प्रथमस्थानके चैव नवमस्थानके तथा ॥ सौम्यानि खारिजानि स्युर्मुन्कलीबानि वा तथा ॥ पंचमे चाष्ट

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. मेचैवदाखिलानिशुभानिचेत्॥ नदातुसुखरूपेणयात्राभवतिनिश्चितं॥ गत्वातत्रधनप्राप्तिर्भविष्यतिविनिश्चितं॥
८६ अथवापंचमस्थानेतथैवाष्टमकेपिच॥ नसनिशकलानीहखारिजानिशुभानिचेत्॥ यन्निमित्तंकृतायात्रातत्प्राप्ति
र्नैभवेत्तदा॥ अथवाप्रथमस्थानेनवमस्थानकेतथा॥ सौम्यदाखिलसंज्ञानिसौम्यमाविनकानिचेत्॥ क्रूराणिवा
यदिस्युश्चतदातत्रफलंदिशेत्॥ यात्रामिथ्याभवेत्तस्ययात्रानस्याद्विनिश्चितं॥ अथवाप्रथमस्थानेसप्तमेस्थानके
तुवै॥ चतुर्थस्थानकेचैवनवमस्थानकेतथा॥ जमानंकजदाखीलंतथैवांकीशसंज्ञकं॥ वसतं[illegible]दाखीलंतथै
वानवदाखिलं॥ ≡ ⁝ ≡ ≡ ⁝ एतानिशकलानिस्युस्तदातत्रफलंदिशेत्॥ एकःसेठयानाहियात्रायाःसात्मा
स्तुखः॥ अथवाकजखारीजंतथैवातवखारिजं॥ यदिस्युस्तेषुयोगेषुतदातत्रफलंदिशेत्॥ अकस्मात्स्वकस्तर्हिरोगीस्याद्रोग्य
रेकया॥ मार्गविस्मरणंयद्वाभवेद्दुःसुभयंतुवा॥ अथवाउकलाख्यं ÷ चनकीयलखदं ÷ चवै॥ हुमरा ≡ चाकिमं ≡
चैवपूर्वोक्तस्थानकेषुच॥ एकःकोमार्गेनध्यंतुदुःखीस्यात्संज्ञतोपिवा॥ मार्गेवंधकरैस्यश्चभयंस्यात्तुविनिश्चितं॥ व राम.
स्तुनष्टंभवेद्वापियथाहृयवनःपुरा॥ यद्वापंचदशस्थानेयद्वाचाष्टमकेपिच॥ उकला ÷ यदिसंतापोनस्याद्रोगस्तदा ८६
ध्रुवं॥ कस्मादिहिशिभवेद्यात्राशकलेतिविनिश्चये॥ कृतेप्रश्नेबुधःकुर्याद्रमलस्यक्रियांशुभां॥ यदातुसप्तमाश्चैवनव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मा च्छकलान था॥ शकलं कार्यसु न्यन्नं नस्मात्सर्वं फलं दिशेत्॥ उत्पन्नं शकलं चैन त्प्राचीदिक्स्थं यदा भवेत्॥ प्राच्यां दिश
भवेद्यात्रा शकलेति विनिश्चितं॥ तदेव शकलं जातं यदा पश्चिमदिग्गतं॥ पश्चिमस्था तदा यात्रा शकलेति विनिश्चि
तं॥ तदेव शकलं यातं दक्षिणस्था यदा भवेत्॥ तदा दक्षिणदिग्भागे यात्रा तु सफला भवेत्॥ [illegible] यात्रा भवेद्द्य कृते प्र
श्नं विलोकयेत्॥ रमलं तत्र नवमस्थानं यत्नाद्विलोकयेत्॥ तत्रैव नवमस्थाने शकलं यत्तु संगतं॥ तस्मात्सर्वं फ
लं वाच्यमित्याह यवनः पुरा॥ अथ नवमस्थानके चेत्स्यात् [illegible]ण ॥ शकलोत्तमं॥ तदास्याद्गुरुशौ लाभो विद्याभाग्यं तथैव
च॥ सुश्रेष्ठपदलाभश्च भवेदिति विनिश्चितं॥ यदि स्यान्नवमस्थाने कब्जदाखिल मागतं॥ तदा धनस्य बहुधा कुशी
लपादं तं बुधः॥ अथवा नवमस्थाने कब्जखारिज मागतं॥ तदा तु शत्रुणा सार्द्धं कलहो निश्चितं भवेत् [illegible] मरणं च भवेन्नू
नं तन्निमित्तेन निश्चितं॥ अथवा नवमस्थाने शकलं फरहा भवेत्॥ तदा तु प्रेमपात्रेहि स्वयं मामृ भवेत्सौख्य॥ अथवा न
वमस्थाने जमातं शकलं भवेत्॥ यात्रामध्ये तदा नूनं विधाय युक्तितो पिवा॥ धनप्राप्तिर्भवेच्चैव भूमिलाभश्च वै भवेत्
॥ अथवा नवस्थाने उक्कला शकलं भवेत्॥ यात्रामध्ये महत्कार्यं प्राप्तं स्याद्वा भवेद्ध्रुवं॥ अथवा नवमस्थाने चाक्कि
शं शकलं भवेत्॥ तदा नवीना दयिता प्राप्ता स्याद्यात्रयानया॥ अथवा नवमस्थाने हुमरा शकलं भवेत्॥ यात्रा

87

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रासि· मध्येनराणां न केनचित्कलहो भवेत्॥ अथवा नवमस्थाने व्ययाजेंशा कलं भवेत्॥ ९ नराया त्राप्रसं ८
८७

गेन सुवस्त्राभरणादिकं॥ बहुशस्त्रं भवेत्स्यामुमित्याह यवनः पुरा॥ अथवा नवमस्थाने तु स्त्रत्वा रिजमागतं ॥ तेरे
यात्राप्रसंगेन कश्चिद्दि व्यागमो भवेत्॥ अपूर्ववस्तुलाभश्च शरीरे सुखमुत्तमं॥ अथवा नवमस्थाने सहूविलः मारा
ने॥ नरायात्राप्रसंगेन केनचिन्महतासह॥ पुरुषेण च मैत्री स्यादित्याह यवनः पुरा॥ अथवा नवमस्थाने [illegible] रवारिजे भवे
त्॥ नरायात्राप्रसंगेन बंधनं स्याद्विनिश्चितं॥ कारागृहादिकं चैव नस्याद्वैरं च वै भवेत्॥ अथवा नवमस्थाने न [illegible] व
दं भवेत्॥ नराशस्त्रादिकं चैव [illegible] तं चौरेण वै भवेत्॥ [illegible] नवमस्थाने ह्यानवेदा खिलं भवेत्॥ यात्रामध्ये नराभू
यादानं दसौख्यमेव च॥ अथवा नवमस्थाने तु जन्म मायाः ह्वयं भवेत्॥ यात्रामध्ये कृते धातुमामासात्तु विनिश्चितं॥ चि
रकालं भवेत्स्थैर्यमित्याह यवनः पुरा॥ अथवा नवमस्थाने तरीकेशाकुलः भवेत्॥ यात्रामध्ये नरास्थैर्येन भवेद्धि कदाचन
॥ एकस्थाने भवेन्नैव स्थैर्यं चेति विनिश्चितं॥ यात्राप्रसंगे [illegible] नेत्र रमलं च विलोकयेत्॥ नवमे सप्तमस्थाने जमानशकलं राम·
भवेत्॥ व्ययाजः मिजन्म मायः चाष्टमरारके [illegible] थिवर॥ एकस्तु नरायात्रा बहुवर्षं करिष्यति॥ अस्यापि मासि शक ८७
लं सार्वितं चेद्भविष्यति॥ यावज्जीवं [illegible] नवमस्थाने कलत्र खिलमागतं॥ तुस

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्यखिलकं चैव ॥ तथैवानवद्याखिलं ॥ पृच्छकस्तु तदा तत्र यात्रायां स्थिरतो भवेत् ॥ अथवा सप्तमस्थाने नकीयरल
रवदं भवेत् ॥ फलं रव्यं वा ॥ तरीकं वा ॥ तदा तत्र फलं दिशेत् ॥ तदा पृच्छकचित्ते तु निश्चयो न भविष्यति ॥ गमिष्ये न गमि
ष्यामि चित्तेन च्छेत्कदा कदा ॥ अथवा सप्तमस्थाने तस्यार्णं शकलं भवेत् ॥ तुसन्त्वारिजकं वापि ॥ तदा तत्र फलं दि
शेत् ॥ पृच्छकः कार्यसिद्धिं च कृत्वा च पुनरागमेत् ॥ अथवा सप्तमस्थाने कजरवारिजमागतं ॥ आतवे रवारिजं चैव ॥
उकलारव्यं तथैव च ॥ निराशः पृच्छकस्तर्हि आनेवे न वि[illegible] ॥ तं ॥ विमनस्कश्च वै नूनमागच्छेन्निजमंदिरं ॥ यात्रायां संग
तिः कस्य भवेदिति विनिश्चितं ॥ कुतोऽमश्रे तदा कुर्याद्रमले कावलोकयेत् ॥ रमले नवमस्थानं प्रयत्नेन विलोकयेत् ॥
तत्र यच्छकलं भूयात्फलं तदनुसारतः ॥ यदि स्यान्नवमस्थाने सूर्यस्य शकलं शुभं ॥ तदा सत्ता[illegible]सराष्ट्रलोकै
स्तथैव च ॥ तथा माण्डलिकैर्भूपैर्धनधान्याधिपैस्तदा ॥ संगतिर्निश्चयं भूयाद्दिल्लीश यवनः पुरा ॥ अथवा नवमस्था
ने चंद्रस्य शकलं भवेत् ॥ परवृत्तांत विद्भिश्च तथैव पद्मरंजकैः ॥ वस्त्रोत्पत्तिकरैश्चैव तथा पानीयघातृभिः ॥ द्वतैश्चै
व च भिक्षैश्च भवेत् संगस्तदा ध्रुवं ॥ अथवा नवमस्थाने शकलं मंगलस्य च ॥ मार्गावरोधकैश्चौरैस्तथा रुधिरकर्म
भिः ॥ घातकैर्हिंसकैश्चैव सर्वरक्षाकरैस्तथा ॥ पृच्छकस्य तदा भूयात् संगतिश्चेति निश्चितं ॥ अथवा नवमस्थाने बुध

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.शि. स्यशकलं भवेत्॥ नराः लेखनकौशल्यैः सहालेखनकर्मभिः॥ लेखकैश्चित्रकारैश्च वेदैर्ज्योतिषिभि[illegible]॥ रमलज्ञै
८८ रोजकीयैः संगतिः स्याद्धि निश्चितं॥ अथवा नवमस्थाने शकलं स्याद्बृहस्पतेः॥ नराश्च पंडितैश्चैव न्यायान्या[illegible]कैः
तपस्विभिः सदाचारैः श्रेष्ठैः स्यात्संगतिर्ध्रुवा॥ अथवा नवमस्थाने शुक्रस्य शकलं भवेत्॥ सुगंधव्यवसायैश्च तथा वैन
नैकैर्गणैः॥ नृत्यकैर्गायकैश्चैव नया गायकभेदकैः॥ ॥ स्त्रीभिश्च संग[illegible]यानुद्भूतयो
वनैः॥ अथवा नवमस्थाने मंदस्य शकलं भवेत्॥ दाक्षिणात्यैस्तदा लोकै रौद्रीच्यैरग्निसेवकैः॥ कारागृहादिवंधैश्च
तथा कुग्रामवासिभिः॥ कृ[illegible]यात्रायां संग[illegible] निश्चितं॥ अथवा नवमस्थाने राहोः केतोश्च वै भवेत्॥ शक
लं यदि यात्रायां संगतिः स्यात्तदा ध्रुवं॥ अंधकैः कुष्ठिभिश्चैव पंगुभिः पिशुनैस्तथा॥ षंडैश्चैव निर्विनिर्देश्यमित्साद्यवनः
पुराः॥ ऋणगृहीतं भक्ष्येन केनचित्क्रियते भुवि॥ गमलं तु नरः कुर्याद्दृष्ट्यं च प्रयत्नतः॥ द्वितीयं तत्र यत्स्थानं तत्स्थानं राम
एकैकस्य हि॥ अष्टमस्थानकं ज्ञेयं मृणधातु धनस्य हि॥ द्वितीयेन तत्र चेद्ग्रहे सौम्यं दाखिल मागतं॥ अष्टमे सौम्यखारी ८८
जं नरा तत्र फलं दिशेत्॥ धनिको दास्यति धनं एकैकस्तु गृहीष्यति॥ सौम्यसाथितकं चेत्स्यात्फलं दाखिलवद्भवेत्॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सौम्ये च समुन्कलीबं स्यात्फलं खारिजवद्भवेत्॥ अष्टमस्थानकं यद्वा क्रूरं दाखिलमागते॥ क्रूरं सा विनकं वापि तदा
तत्र फलं दिशेत्॥ नदास्यति धनं किंचिद्धनिकश्चेति निश्चितं॥ अथवा प्रथमस्थाने द्वितीयस्थानकेन था॥ क्रूरदाखि
लसंज्ञं स्यात्क्रूरं वा मुन्कलीबकं॥ अष्टमस्थानके चेत्स्यात्सौम्यं खारिसंज्ञितं॥ सौम्यं तु मुन्कलीबं तु तदा तत्र फलं दिशे
त्॥ धनिको दास्यति धनं परं तु ग्राहकस्त्वथ वै॥ कश्चिद्दास्यति किंचित्तु कैस्तो नरः पि दुर्लभं॥ यद्वा द्वितीयभवने कुमराश
कलं भवेत्॥ इ कबजखारिजं [illegible] पितशैवानवर्तं वा [illegible]॥ तदा किंचिदपि स्नेही नदास्यति धनं च वै॥ यद्वा द्वितीय
भवने तरीकं शकलं भवेत्॥ फरहाः च वस्या जे इ [illegible] तदा तत्र फलं दिशेत्॥ अर्थं चास्यति वाद्देन धनिकश्च धनं त
दा॥ यद्वा द्वितीयभवने जमाते इ वेज्निमायकं॥ इ शकलं यदि जायेत तदा तत्र फलं दिशेत्॥ [illegible] समये चैव
नदास्यति धनं नरः॥ धनिकैर्याचितं चेत्स्यान्नराः कुर्युश्च निश्चितं॥ पश्चाच्च चिरकालेन धनदाः [illegible] संशयम्॥
89 साक्षिणः सत्यवक्तारः किंवा मिथ्याभिवादिनः॥ इति प्रश्ने कृते तत्र रमलं तु विलोकयेत्॥ प्रथमात्सप्तमाच्चैव शकु
लं कार्यमुत्तमं॥ एतयोरुभयोर्योगाच्छकलं कार्यमुत्तमं॥ एतस्मात् शकलात्सर्वं फलं वाच्यं मनीषिभिः॥ उत्प
न्नशकलं यत्तु नच्चेन्नु खहा खिलं॥ आतवे दाखिलं वापि तथा कबजलदाखिलं॥ इज्तमाय इ [illegible] ते इ बा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र०स० ८९ जमानात्स्यंतु वा भवेत् ॥ साक्षिणः सत्यवक्तारो भूता वास्तु स्तदा भवेत्। अथवा नतु शकलं फरहाख्यं [illegible]विष्यति
८९ ॥ नरीकं वापि लह्याणं तुस्त्र खारिजकं तथा ॥ केचित्तु सत्यवक्तारः केचिन्मिथ्याभिवादि[illegible] एवान
तु शकलं कब्जखारिजसंज्ञकं ॥ आतवे खारिजं चैव उक्ता ह्येशकलं तथा ॥ नकीयलखदं चैव [illegible] तनू
कलं दिशेत्। साक्षिणस्तु तदा नूनं नित्यं मिथ्याभिवादिनः ॥ द्वयोः परस्परं वादे सत्यमिथ्यादिसंशि[illegible]ते ॥ को भवेत्सत्यवा
दी च मिथ्यावादी च को भवेत् ॥ उभयोरिति संप्रश्ने कृते तु रमलं चरेत् ॥ प्रथमान्नवमाच्चैव शकलं [illegible] ॥ एतच्छक
लसंबंधः पृच्छकेन च वर्तते ॥ अष्टमाच्च तृतीयाच्च शकलं कार्यमुत्तमं ॥ एतच्छकलसंबंधः प्रतिस्पर्द्धं जनस्य च ॥ एतच्छ
कलस्तु स्माच्च फलं सर्वं विनिर्दिशेत् ॥ एतच्छकलेसु गमं [illegible] च्च दाखिलं ॥ आतवे दाखिलं चैव तथा कब्जलदाखिलं
॥ जमान मिज्निमायं च वयाज[illegible]त्यं नथैव च ॥ यदि स्यान्नहि सत्यं च वार्त्तो वादी निनिश्चितं ॥ अथवा कब्जखारीजं
स्यातवे खारिजं तथा ॥ नकीयलखदं चैव तथैवोक्ता ह्ययं च वै ॥ अंकीश कुमरा चैव यदि स्यान्नहि तत्फलं ॥ मिथ्या राम.
त्वं तत्र निर्दिष्टमित्याह यवनः पुरा ॥ यद्यानच्छकलं दृष्ट्वा फरहाख्यं भविष्यति ॥ नरीकं वापि लह्याणं तुस्त्र खारिजकं ८९
तथा ॥ किंचित्सत्यं च मिथ्या च वदतीति विनिश्चितं ॥ विक्रयार्थं च यद्वस्तु धनिकः प्रेषयिष्यति ॥ तस्य प्रश्ने कृते तत्र रम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लं च विलोकयेत्॥ प्रथमे च द्वितीये च तथैवैकादशे गृहे॥ द्रष्टव्यं च प्रयत्नेन यस्माह यवनः पुरा॥ अथवा प्रथमस्था
ने शकलं सौम्यदाखिलं॥ द्वितीये सौम्यखारीजं तदा तत्र फलं दिशेत्॥ विक्र यः शीघ्रकालेन भवेद्धनिकवस्तुनः॥
अथवा क्रूरदारवीलं यदा क्रूरं च सावितं॥ तदा तु विक्रयो न स्याद्धनिकस्य च वस्तुनः॥ अथ क्रूरखारीजं क्रूरं वा मुन्क
लीबकं॥ यदि स्याद्विक्रयस्तर्हि हानिः कृत्वा भविष्यति॥ अथवा प्रथमस्थाने तथैवैकादशे गृहे॥ शकलं क्रूरखारीजं
यदि स्यात्तर्हि तत्फलं॥ फलम[illegible]चेद्धानिः कृतो[illegible]भवेत्॥ अथवा प्रथमस्थाने तथैवैकादशे गृहे॥ तुस्तह्
खिलकं चेत्स्यात्तथा[illegible]लदाखिलं॥ आतशे[illegible]खिस चैव जमातारव्यं तथैव च॥ बहुलाभस्तदा भूपादि
त्याह यवनः पुरा॥ अथवा प्रथमस्थाने तथैवैकादशे गृहे॥ वयाज मिज्नमाय वाजमानारव[illegible]च॥ यदि स्या
त्तर्हि लाभो वा न हानिश्च प्रजायते॥ अथवा प्रथमस्थाने फरहा शकलं भवेत्॥ नकी वापि लह्याण तथा तुस्तत्
खारिजं॥ स्वल्पलाभस्तदा भूपादित्याह यवनः पुरा॥ अथवा प्रथमस्थाने तथैवैकादशे गृहे॥ हुमरा [illegible]किं
वा[illegible]कजखारिजकं तस्मा॥ आतशे खारिजं चैव उकलारव्यं तथैव च॥ नकी यलखदं चैव यदि स्या[illegible]त्फलं
लाभस्तु न भवेत्तर्हि किंचिद्धानिः प्रजायते॥ अथवा द्रव्यहरणं भूपाद्वा चौरभीर्भवेत्॥ अथवा स्यान्महद्दि[illegible]व्यसे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ति विनिर्दिशेत्॥ समुद्रमध्ये यात्रायाः कृते प्रश्ने विलोकयेत्॥ रमलं च प्रयत्नेन ततः सर्वं फलं दिशेत्॥ [अ]त्र चेत्प्र
थमस्थाने लह्याणं ॥ शकुलं भवेत्॥ नकीकं ॥ चवयाजेच ॥ तथैवानवद्याखिलं ॥ नवमे पुनरुक्ते त[...] दशमे गृ
हे॥ त्रयोदशगृहे चैव तदा तत्र फलं दिशेत्॥ समुद्रमध्ये नौका तु तदा शीघ्रं गमिष्यति॥ अथवा प्रथमस्थाने[...]ः
शकुलं भवेत्॥ उत्कारव्यं तु ॥ भवेच्चैव नकीयलरवं ॥ तथा॥ कव्रद्वाखिलकं ॥ चैव तदेव पुनरागतं ॥ षष्ठके च
ष्टमे चैव द्वादशस्थानके तथा॥ प्रतिकूलस्तदा भूयान्नौकायाः पवनश्च वै॥ अर्कलस्य तदा नौका[...]मध्ये विशेष
तः॥ अत्रैव केंद्रस्थानेषु चतुर्थेपि च निश्चितं॥ क्रूरं शकुलकानि स्युस्तदा तत्र फलं दिशेत्॥ त[...]समुद्रमध्ये तु नौ
का मग्ना भविष्यति॥ अथवा केंद्रस्थानेषु चेत्तु[...]॥ सौम्यानि शकलानि स्युस्तदा तत्र फलं दिशेत्॥ विशेषा
त्सकटान्मात्रः पश्चात्स्वसुखरूपतः॥ आगमिष्यति नौका वै तीरस्य च समीपतः॥ अथवा प्रथमस्थाने अंकीशं तु ॥ वि
निश्चितं॥ जमातं ॥ शकलं चैव तथा कञ्जोलखारिजं ॥ आव्वेरखारिजं ॥ वापि यदि स्यात्प्रथमे गृहे॥ चतुर्थे षष्ठके चैव
त्वष्टमे द्वादशे तथा॥ यदि स्यात्पुनरायाते नेष्वान्यच्च विलोकयेत्॥ क्रूराणि शकलानि स्युः केंद्रस्थानेषु चैव हि॥ तदा नौ
का भवेत्तस्य जले मग्ना भविष्यति॥ अथवा प्रथमस्थाने यदि स्यादिज्जतमायकं ॥ तुस्त्वरवारिजकं वापि ॥ तुस्त्वद्वाखिल

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कंतथा ॥ फरहारव्यं शकलं चैव यदि स्यात्प्रथमे गृहे ॥ नवमे दशमे चैव तथैवैकादशे गृहे ॥ तृतीयस्थानके चैव
यदि स्यात्पुनरागते ॥ तदा तु चिरकालेन तीरे नौकागमिष्यति ॥ परं तु सुखरूपेण यवनानां मतं यथा ॥ विद्याप्राप्तौ
कृते प्रश्ने रमलं तु विचारयेत् ॥ प्रथमान्नवमाच्चैव शकलं कार्यमुत्तमं ॥ तस्मात्सर्वं फलं वाच्यं यथा यवनभाषि
तं ॥ उत्पन्नं शकलं तत्तु चेत्स्यात्तु स्नहारिवलं ॥ आतवेदारिवलं वापि जमानारव्यं तु वा भवेत् ॥ इज्तमायाह्वयं
वापि तदा तत्र फलं दिशेत् ॥ भवेद्याप्राप्तिर्बहुतरा भविष्यति न संशयः ॥ अथवा तत्तु शकलं कञ्जदाखिलकं भ
वेत् ॥ तरीकं वा वख्तौजं वा फरहारव्यं तु वा भवेत् ॥ लैह्याणारव्यं तु वा चेत्स्यात्तु स्नतवारिजकं तु वा ॥ तदा विद्या
भवेत्प्राप्ता किंचित्किंचिन्नवै भवेत् ॥ विद्याभ्यासे भवेद्विघ्नं नात्र कार्या विचारणा ॥ अथवा तत्तु शकलं दुमरारव्यं
भविष्यति ॥ उकलारव्यं भवेद्वापि नकीयं लरवदं तु वा ॥ कञ्जरवारिजकं वापि तथैवातनवूरवारिजं ॥ अंकीशा
रव्यं भवेद्वापि तदा तत्र फलं दिशेत् ॥ विद्या नास्ति न दातिष्ठेन्मूर्ख एव भविष्यति ॥ दानधर्मादिकं किंचिन्नयाद्यत्नैः कि
91 यते कृते ॥ यस्योद्देशेन तत्तस्मै प्राप्तः स्याद्वा न वेति च ॥ कृते प्रश्ने तु रमलं कुर्यात्तत्र प्रयत्नतः ॥ तत्र चेत्प्रथमस्थाने
नवमस्थानके तथा ॥ शकलं सोम्पदारवीलं भविष्यति तथैव च ॥ एकादशे पंचदशे षोडशे पुनरागते ॥ तदा तत्तस्य सं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.चि.
९१

प्राप्तं यद्वदेशेन पल्कतं ॥ अथवा प्रथमस्थानेन नवमस्थानके तथा ॥ सौम्यं स्वारिजकं चेत्स्यात्सौम्यं वा [illegible]लीवकं
॥ तदा किं चिद्भवेत्प्राप्तं किंचिन्नेति विनिर्दिशेत् ॥ राशौ दृष्टस्तु यः स्वप्नस्तस्य प्रश्नेकृते सति ॥ रमले स्वे यदि त्रैन स्था
न्सर्वं फलं दिशेत् ॥ तत्र यन्नवमस्थानं तत्स्थं यच्छकलं भवेत् ॥ तदेव शकलं यस्मिन्स्थाने स्यात्तु नरागतं ॥ तत्स्था
नसंस्थशकलात्सर्वं स्वप्नं विनिर्दिशेत् ॥ अथवा शकलं तत्तु न भवेत्तु नरागतं ॥ तदा तु नवमस्थाने शकलात्स्वप्नमादि
शेत् ॥ तत्र चेत्कू[illegible]स्वारीजं कूरं वा मुन्कलीवकं ॥ तदा न किमपि स्वप्नो वक्तव्यस्त्वमनीषिभिः ॥ तदापि नवमस्थाने श॥
कलं यत्समागतं ॥ तस्मात्स्वप्नं तु संवाच्यं मिथ्याहृदयवर्तनः पुरा ॥ नवमस्थानके चेत्स्यात्स्व्हयाणशकलं शुभं ॥ स्वप्ने दृष्टा
भविष्यंति विद्वांसो धर्मशास्त्रिणः ॥ देवालयादिकं चैव पुष्पैनपैमोमुकादिकं ॥ माणिक्यं पद्मरागश्च प्रवालानि तथैव च ॥ स्व
प्ने दृष्टा भविष्यंति वस्तु कुक्कुटकादयः ॥ अथवा तत्र मस्थाने कब्जदाखिल मागते ॥ स्वप्ने दृष्टा भविष्यंति तदा वै भाग्यपूर
षाः ॥ तदा मांडलिका भूपा धनिकाः स्वर्णविक्रयाः ॥ मुद्रादि रत्नगेहानि तदा न स्थानस्थलानि चेत् ॥ पण्यं स्थलं मौक्तिका
नि तथा श्रोत्रांजनं च वै ॥ गंधकोहरितालश्च तथैव च मनःशिला ॥ हरिणो मृगजातिश्च द्रव्यं वै रूपकादिकं ॥ स्वप्ने दृष्टं
भवेद्दृत्त तथा नारं च निर्दिशेत् ॥ अथवा तत्र संस्थाने कब्जखारिजमागते ॥ स्वप्ने दृष्टा भविष्यंति तदा घातकिनो जनाः

राम.
९१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तथाजागरकन्ये नजनानांवधकारिणः॥ चांडालाश्चैवगेहानितुटितानिस्त्रूहमानिच॥ अन्नपूर्णानिगेहानिदृश्यन्तालोच
लिस्तथा॥ सारमेयावराहाश्चशलभाःकाकजातयः॥ उलूकाश्चैवसीसंचलोहकंतुतथैवच॥ स्वप्नेदृष्टंभवेत्तेननात्र
कार्याविचारणा॥ अथवातत्रसंस्थानेजमाते ≡ शाकलंभवेत्॥ स्वप्नेदृष्टाभविष्यंतितथावैलेखकानराः॥ दैवज्ञाभिष
जश्चैवतथारमलकोविदाः॥ सारिकाशुद्विरीघोदिलेखनज्ञास्तथैवच॥ पुस्तकादिकभाराश्चकागलानांतथैवच॥ आ
नंदकारिगेहाश्चचित्रशालापु[illegible]निच॥ पट्टकूलादिवस्त्राद्रिःयारत्नविशेषकाः॥ काचकूपाश्चविज्ञेयापेरोजारव्याम
णिस्तथा॥ पाषाणजातिभेदाश्चमहिषीगोमतंगजाः॥ स्वप्नेदृष्टाभविष्यंतिगायकानर्तकास्तथा॥ अथवातत्रसंस्थाने
फरारव्यशकलाद्भवं॥ सालंकाराःस्त्रियश्चैवकिशोरारमणीयकाः॥ रंजितानिचवस्त्राणिसुगंधाविविधास्तथा॥ मुक्ता
फलानिपाषाणरत्नंविद्युद्भयापदं॥ हंसहाःपक्षिणश्चैवसेनजान्मादयश्चवै॥ रूप्यंमनोहरंचैवस्तूहत्कोलालमेवच
॥ स्वप्नेदृष्टाभवेदेतद्धरितंभूमिमंडलं॥ अथवातत्रसंस्थानेस्यादकौशाह्वयंपरा॥ स्वप्नेदृष्टाभविष्यंतिलदावैनम
लोचनाः॥ नदैवांकुरितंवस्तुयाम्यादिगमनादिकं॥ रात्रिस्तमश्चसर्वत्रश्यामवर्णस्तथैवच॥ क्रूरंभयानकंवस्तुखना
ममाणितंध्रुवं॥ स्वप्नेदृष्टंभवेदेतदिंम्याहयवनःपुरा॥ अथवातत्रसंस्थानेउकला ÷ शाकलंभवेत्॥ स्वप्नदृष्टाभवि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰ सिं॰ ष्यंति कारागृहनिपातिनः ॥ अग्निश्च पृथिवी चैव पूर्वदिग्गमनादिकं ॥ याम्यदिग्दर्शनं वापि तथैवांकुरितादिकं ॥ पुरु
९२ षाद्विवसश्चैव पर्वतन्द्वारशृंगकं ॥ स्थानं चिंताकरं चैव गाढं नाभिस्तमेव च ॥ विरोधः कलहश्चैव वस्त्रं नीलं च लोहि
तं ॥ उत्पत्तिकान्तदेशाश्च श्मशानानि तथैव च ॥ स्वप्नदृष्टं भवेद्येन तन्मात्र कार्यविचारणा ॥ अथवा तत्र संस्थाने द्रुमस्य
शकलं भवेत् ॥ स्वप्नदृष्टा भविष्यंति पुरुषास्तस्कराश्च ये ॥ प्रभंजनः प्रकोपश्च पश्चिमांगमनादिकं ॥ स्थिरता क्रूरता चै
व रक्तवर्णस्तथैव च ॥ क्वचित्स्यामलकारित्वं मार्गरोधकराश्च वै ॥ रक्तपाषाणकश्चैव वस्तु मृण्मयपात्रकं ॥ मुक्ताशुक्ति
स्तथा ज्ञेया लोहनाम्नाङ्क वापि वा ॥ शिबिका च चतुष्कोणा सदनानुद्वसानि च ॥ मद्यमांसादिकं चैव वस्त्राण्यलोहितानि
च ॥ स्वप्नदृष्टं भवेद्येन दिव्याश्च पवनः पुरा ॥ अथवा तत्र संस्थाने वयाजं शकलं भवेत् ॥ स्वप्नदृष्टा भविष्यंति नदास्त्री
जलराशयः ॥ उदीच्यां गमनाद्यं च तथैवांकुरितानि च ॥ श्वेतवर्णश्च संप्रोक्तो महत्तानंदपूर्णता ॥ मनोहराणि हरिता
दृश्यन्ते भूमिरेव च ॥ प्रवहत्सलिलं चैव तथैवोपवनानि च ॥ फलपुष्पैः समृद्धानि तथा हस्तकदंबकं ॥ वस्त्राणि बहुमौ राम॰
ल्यानि पात्रेऽन्नपरिवेषितं ॥ विल्लौरमौक्तिकं चैव मुक्ताशुक्तिस्तथैव च ॥ लवणं चैव वंगं च सीसकं कागलाश्च वै ॥ स्वप्न ९२
दृष्टं भवेद्येन तन्मात्र कार्यविचारणा ॥ अथवा तत्र संस्थाने तु स्त्रत्वारिजमागतं ॥ अग्निश्चाकरजन्यं च स्वप्नदृष्टं भ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वेनदा॥ दिवसः पुरुषश्चैव सौम्यत्वं त्वविशेषतः॥ पीतस्निग्धः श्वेतवर्णः पीतमिश्रश्च लोहितः॥ समुद्राधिनासिका चैव वन्या
यस्य करणं तथा॥ राजगृहसमीपे तु गृहमुच्चं मनोहरं॥ प्रतीचीसंस्थितं सर्वं पात्रं च परिवेष्टितं॥ वस्त्राणि बहुमौल्यानि ह्
संतीप्रसूतीनि च॥ हरिताश्चैव रत्नानि प्रवालानि तथैव च॥ पित्तलं हरितालं च सुवर्णं सुद्रिकादिकं॥ मृद्गोलो मृण्मयं पात्रं
स्वप्नदृष्टं भविष्यति॥ अथवा नत्रसंस्थाने तु सहस्त्रिलमागतं॥ ॥ स्वप्नदृष्टं भवेन्नहि जलं चांकुरितादिकम्॥ उदीच्यां गम
नासंयं च सौम्यत्वं सर्वतश्च वै॥ वनिताश्च निशा चैव सत्कृष्णश्वेतवर्णकं॥ वसतिस्थानकं चैव मनोहरमनुत्तमं॥ हरितस्था
नकं चैव तथैवास्तरणानि च॥ वस्त्राणि च महार्हाणि श्वेतपीतासितानि च॥ मुक्ताफलविशेषश्च प्रवालानि तथैव च॥ त
थाहसंतिकादीनि दुकूलानि च भूरिशः॥ वर्गरौप्यं मुद्रिकादि स्वप्नदृष्टं भविष्यति॥ अथवा नत्रसंस्थाने भवेदानवस्वारि
जं ॥:॥ अग्निश्चाकरजन्यं च स्वप्नदृष्टं भविष्यति॥ पूर्वदिग्गमनासंयं च क्रूरतासर्वतः स्थिता॥ दिवसः पुरुषश्चैव रोगंभ्या
प्यभयस्तथा॥ कृष्णमेचकवर्णाभ्यां मिश्रितः पीतवर्णकः॥ अरण्यसदृशानीह गेहानि सुमहान्ति चेत्॥ जनसमुक्तानि
चौर्यं च मृन्पात्रं गोलकस्तथा॥ इष्टिका च चतुष्कोणा लोहं सूचीतथैव च॥ संकोचितानि वस्त्राणि रंजितानि विशेषतः
स्वप्नदृष्टं भवेदेतद्यथाह यवनः पुरा॥ अथवा नत्रसंस्थाने नकीयलस्वदं भवेत्॥ ॥ उदीचीगमनासंयं च जलं चांकुरितं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र.सि. भवेत्॥ पुरुषाश्च स्त्रियश्चैव रात्रिश्च दिवसस्तथा॥ स्थानभेदेन विज्ञेयं तथापूर्वमुदाहृतं॥ बहुजलस्य सामीप्येस
९३ ह्नानितथैवच॥ हरितंभूतलंचैव वृक्षसंघस्तथैवच॥ तस्मिन्स्थाने स्त्रीपुरुषैः कृतंस्याद्गमनादिकं॥ मद्यमांसादि
केचैव वस्त्रं हरितमेव्वकं॥ काचकूपश्च पाषाणविशेषस्तान्त्रमेवच॥ स्वप्नदृष्टं भवेदेतद्यथा हृयवनः पुरा॥ अथवा
तत्रसंस्थाने भवेदानवराखिलं॥ महान्मभंजनश्चैव प्रतीचीगमनादिकं॥ सौम्यत्वं रक्तवर्णश्च पुरुषादिवसस्तथा
श्वेतवर्णश्च वनिताहृस्समध्ये महद्गृहं॥ प्रवहत्सलिलं चैव तथागजगृहं च वै॥ अश्वाश्चैव महद्रुहेतथैवास्तरणानि॥
च॥ दुकूलोर्णासुवस्त्राणि बहुमूल्यदृसंतिका॥ आनंदो मद्यमांसेन्व भक्ष्याभक्ष्यविशेषकाः॥ मुक्ताफलंप्रवालानिमु
क्ताशुक्तिस्तथैवच॥ काचकूप्यस्यप्रस्तारविशेषोविल्लौरंतथा॥ स्वप्नदृष्टंभवेदेतद्यथा हृयवनः पुरा॥ अथवा तत्रसं
स्थाने शकलं चेज्ञिमायकं॥ वायुश्च पश्चिमाशाच सौम्यत्वं क्रूरताचवै॥ पुरुषादिवसश्चैव स्थिरताधूम्रवर्णकः॥ चि
त्रितसदनंचैव तत्समीपे महाद्रुमाः॥ जलेवास्तरणानीह बहुमौल्यानि सर्वतः॥ सूचीकर्मकराश्चैव रमलज्ञास्तथैवच॥ दै राम.
वज्ञाश्च तथाप्रोक्ताः कागलोधर्मकारिणः॥ भक्ष्याद्यन्नं च मांसं च हरितश्वेतवस्त्रकं॥ पीतवस्त्रं च संप्रोक्तं रत्नमणिविशेष ९३
कः॥ नीलापेरोजकाश्चैव पारदो रूप्यमेवच॥ कागलश्चापि विज्ञेयं स्वप्नदृष्टं मनीषिभिः॥ अथवा तत्र संस्थाने तरीकं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शकलं भवेत्॥ कीलालमुत्तरस्यां च तथैव गमनादिकं॥ सौम्यत्वं वनिता चैव तथैव च विभावरी॥ श्वेतवर्णः पीतशुक्
लतया मार्गावरोधकः॥ निशाभ्रमयिणश्चैव शठाधूर्ताश्च वै जनाः॥ मनोहरं च सदनं हरितं भूमिमंडलं॥ प्रवहत्सलिलं
चैव सफलाश्च महीरुहाः॥ राजकीयस्थलं चैव राजकार्यनिकेतनं॥ मुख्यराज्ञश्च सदने भूमिः स्निग्धं घनादिकं॥ ब
हुमौल्यान्यासनानि स्वकीयं भ्रमणं तथा॥ श्रेष्ठानां सदनाद्येव भवेत्पर्यटनं च वै॥ छागमांसवर्जितं च दुकूलं बहुमौल्य
कं॥ बहुमौल्यं सुरंगं च वस्त्रं संकोचितं तथा॥ विल्लौरं चैव रूप्यं च पारदं च तथैव च॥ वस्त्रं रज्वादिकं चैव कागलाः सु
लश्चैव च॥ स्वप्नदृष्टं भवेदेतदित्याह यवनः पुरा॥ इति नवमभवनं संपूर्णं॥ अथ दशमभवनविचारो लिख्यते॥ दश
मे भवने यत्तु संबंधस्तस्य कथ्यते॥ श्रेष्ठस्य मेलनं चैव स्वयोगक्षेमकारणं॥ आवलंबस्य च प्रश्नो दशमगृहतो वदेत्॥
अहं स्वोदरपूर्त्यर्थं राजानं वापि मंत्रिणं॥ मिलिष्यामि कथं वापि फलं स्यात्तदुदस्तभो॥ इति प्रश्ने कृते तत्र रमलं च विलो
कयेत्॥ तत्र यद्दशमस्थानं यत्नतस्तन्निलोकयेत्॥ दशमस्थानके चेत्स्याच्छुकलं सौम्यदाखिलं॥ नराणां तु मिलनं सम्य
९५ ग्लाभदं संभविष्यति॥ चिन्हूनिर्भवेदेका हृयोरिति विनिर्दिशेत्॥ बहुलाभश्च भविता यथाह यवनः पुरा॥ अथवा दश
मस्थाने सौम्यं खारिजकं भवेत्॥ तदा हृयोस्तु चिन्तैक्यं भविष्यति न संशयः॥ परं तु स्वल्पलाभः स्यादित्याह यवनः पुरा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰सि॰ तत्राप्येकादशस्थाने मिलनीयस्य भूपते ॥ द्वितीयं पृच्छकस्येति यवनैः परिभाषितं ॥ अत्र स्थानद्वये यत्र शाकलं दा
९४ खिलं भवेत् ॥ सर्वथा तस्य लाभः स्यादित्याह यवनः पुरा ॥ अथवा दशमस्थाने क्रूरं खारिजमागतं ॥ निष्फलं स्यात्तु तत्
त्र हि मिलनं चेति निश्चितं ॥ मिलनं चेद्भवेत्तर्हि कष्टाधिकं भविष्यति ॥ चित्तैक्यमुभयोर्न स्यादित्याह यवनः पुरा ॥ वर्त्त
मानावलंबश्च तथैव तरिकश्च वै ॥ करिष्यामीति यत्प्रश्ने भवेद्दानं भवेदिति ॥ इति प्रश्ने कृते तत्र रमलं च विलोकयेत् ॥
तत्र चेद्दशमस्थाने शकलं सौम्यदाखिलं ॥ तदा विलंबे लाभः स्यात्तु रतरूपेण निश्चितं ॥ अथवा दशमस्थाने क्रूरं दा
खिलमागतं ॥ तदा कृच्छ्रेण लाभः स्यादित्याह यवनः पुरा ॥ यदा स्थानद्वयेप्यस्मिन्मुन्कलीबं भविष्यति ॥ तदा किंचिद्भ
वेल्लाभः किंचिन्न स्यादितीरयेत् ॥ वर्त्तते योवलंबो मे सोपि न स्याच्छुभावहः ॥ अवलंबस्तथान्यो वा कर्त्तव्यश्चेति पृच्छति
तदा सदा हि कर्त्तव्यो रमलः शास्त्रकोविदैः ॥ तत्रापि दशमस्थाने चतुर्थस्थानके तथा ॥ द्रष्टव्यं च प्रयत्नेन संबंधस्तस्य
कथ्यते ॥ विद्यमानावलंबस्य दशमस्थानमुच्यते ॥ ईप्सितनगावलंबस्य चतुर्थस्थानमुच्यते ॥ स्थानकद्वयमेतत्तु द्रष्ट राम॰
व्यं च प्रयत्नतः ॥ यस्मिन्स्थाने भवेत्सौम्यं शाकलं तु शुभावहं ॥ उभयत्रापि सौम्यं चेत्समीचीनं तदा भवेत् ॥ यदैकस्मिन् ९४
भवेत्सौम्यमेकस्मिन्क्रूरमागतं ॥ तदा तत्र भवेत्सौम्यं तदेव स्याच्छुभावहं ॥ यत्र स्यात्क्रूरशाकलमशुभं तन्निगद्यते ॥ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उभयत्रापि चेत्क्रूरं शकलं हि भविष्यति॥ खारिजं च भवेत्तर्हि भवेदशुभमेव च॥ स्वतएवावलंबस्य कुर्यात्त्यागो न संशयः॥
अथवा चावलंबस्य त्यागः स्यादन्यतोपि वा॥ एतन्स्य राज्ञो मान्यस्य मिलनं शुभदं भवेत्॥ इति प्रश्ने कृते तत्र रमलं च विलोक
येत्॥ इदानीं मिलनं कर्त्तुं कथं स्यादिति पृच्छति॥ तदा तु दशमाद्गेहात्फलं वाच्यं मनीषिभिः॥ अन्यस्थानांतरं गत्वा मिलनं चे
त्कृतं भवेत्॥ तदा कथमिति प्रश्ने चतुर्थात्फलमीरयेत्॥ उक्तस्थानेषु चैतेषु सौम्यानि शकलानि चेत्॥ तदा तच्छुभदं ज्ञेय
मन्यथाशुभमेव च॥ प्रश्ने मातुरवस्थायाश्चतुर्थात्फलमादिशेत्॥ सौम्यं वा क्रूरभावं वा रोगारोग्यं शुभाशुभं॥ सौम्यक्रू
रानुयोगेन विज्ञेयं शकलं बुधैः॥ इति दशमभवनम्॥ अथैकादशभवनं॥ एकादशे स्थानकेस्मिन् मैत्रीप्रश्नो निरू
प्यते॥ मित्रयोरुभयोर्मैत्री सुस्थिरा स्यान्नवेति च॥ कृते प्रश्ने तु यत्नेन पश्येदेकादशं गृहं॥ अथवैकादशे गेहे सौम्य
दाखिलमागतं॥ सौम्यं सावितकं वापि तदा तत्र फलं दिशेत्॥ मित्रयोरुभयोर्मैत्री स्थिराधिकतरा भवेत्॥ लाभश्चा
पि भवेत्तत्र परस्परमिति स्फुटं॥ अथवैकादशे गेहे शकलं क्रूरदाखिलं॥ तथा स्थिरा भवेन्मैत्री परं तु स्वल्पलाभदा॥ अ
थवैकादशस्थाने शकलं खारिजं भवेत्॥ मैत्रीभेदस्तदा भूयान्मित्रयोश्च परस्परं॥ अथवैकादशे स्थाने संस्थितं शकलं तु
९५ वा॥ तदेव द्वादशे गेहे यदि स्यात्तु नरागतं॥ मित्रयोरुभयोर्भूयात्तदा वैरं सुनिश्चितं॥ नजीरउम्मावयानां यदि प्रश्ने कृते भ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र॰ सि॰ वेत्॥ तद्वाप्येकादशस्थानात्फलं वाच्यं मनीषिभिः॥ सौम्यानि शकलानि सुखदानंदप्रदानि च॥ क्रूराणि दुःखदान्ये
९५ व विचार्य फलमादिशेत्॥ अभीप्सितस्य संप्राप्तिर्भवेद्वा नेति निश्चितं॥ कृते प्रश्ने तदा तत्र स्थानमेकादशं तु यत्॥ द्रष्ट
व्यं तु प्रयत्नेन तस्मात्सर्वं फलं दिशेत्॥ अथ वैकादशे स्थाने दाखिलं सौम्यमागतं॥ तदा तु सुखरूपेण भवेदिष्टार्थ
संगतिः॥ अथ वैकादशस्थाने खारिजं शकलं भवेत्॥ तदा तु दुःखरूपेण लाभः स्यादीप्सितस्य च॥ [illegible]शप्रश्ने कृते
